
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

॥ इदं पुस्तकं पंचोपनिषदस्य ॥
॥ मुरारबखरेयस्यपुस्तकं सत्यं ॥

Acc. No. ~~4786~~ M-1894

Title - पञ्चोपनिषद् (चित्ति, शीक्षा, ब्रह्मविद्या, भृगु, नारायण अरुण इ.)

Author - ?

Date - 1709. sub - वेद उपनिषद्.

folio - 45, xerox - 90.

Scribe - सदाशिव मुरारभट्ट बखरे.

श्रीगणेशायनमः॥ ॥ॐरम्॥तछंयोरावृणीमहे॥
गातुंयज्ञाय॥गातुंयज्ञपतये॥दैवीस्वस्तिरस्तुनः॥
स्वस्तिर्मानुषेभ्यः॥ऊर्ध्वंजिगातुभेषजं॥शंनोअस्तु
द्विपदे॥शंचतुष्पदे॥ॐ शांतिः शांतिः शांतिः॥हरिः
ॐ॥चित्तिःस्रुक्॥चित्तमाज्यं॥वाग्वेदिः॥आधीतं
बर्हिः॥केतोअग्निः॥विज्ञातमग्निः॥वाक्पतिर्होता॥॥१॥
मनउपवक्ता॥प्राणोहविः॥सामाध्वर्युः॥वाचस्पतेवि
धेनामन्॥विधेमतेनाम॥विधेस्त्वमस्माकंनाम॥वाच
स्पतिःसोमंपिबतु॥अस्मासुनृम्णंधात्स्वाहा॥१॥अध्व

॥१॥

युः पंचव ॥ १ ॥ पृथिवी होता ॥ द्यौरध्वर्युः ॥ रुद्रोग्नीत् ॥ बृहस्प
तिरुपवक्ता ॥ वाचस्पते वाचो वीर्येण ॥ संभृततमेनायक्ष्यसे ॥
यजमानाय वार्यं ॥ आ स्वस्कर स्मै ॥ वाचस्पतिः सोमं पिबति ।
जजनदिंद्रमिंद्रियाय स्वाहा ॥ २ ॥ पृथिवी होता दश ॥ १ ॥ अग्नि
होता । अश्विनाध्वर्यू । त्वष्टाग्नीत् । मित्र उपवक्ता । सोमः सोम
स्य पुरोगाः । शुक्रः शुक्रस्य पुरोगाः । श्रातास्त इंद्र सोमाः । वा
तापेर्हवनश्रुतः स्वाहा ॥ १ ॥ अग्निर्होता षष्ठो २ सूर्यं ते च
क्षुः । वातं प्राणः । द्यां पृष्ठमंतरिक्षमात्मा । अंगैर्यज्ञं । पृथि
वीं शरीरैः । वाचस्पतेऽच्छिद्रया वाचा । अच्छिद्रया जुह्वा । दि
वि देवावृधं होत्रामेरयस्व स्वाहा १ । सूर्यं ते नव ॥ ४ ॥ महा

हविर्होता। सत्यहविरध्वर्युः। अच्युतपात्रा। अग्नीत्। अच्युत
मनाउपवक्ता। अनाधृष्यश्चाप्रतिधृष्यश्च यज्ञस्याभिगरौ। अ
यास्यउद्गाता। वाचस्पते हृद्विधे नामन्। विधेम ते नाम। विधेस्त्व
मस्माकं नाम। वाचस्पतिः सोमम पात्॥ मा दैव्यस्तंतुश्छेदि माम
नुष्यः। नमो दिवे। नमः पृथिव्यै स्वाहा॥१॥ अपात्रिणि वा ५ वा
ग्घोता। दीक्षा पत्नी। वातोध्वर्युः। आपोभिगरः। मनो हविः।
॥२॥ तपसि जुहोमि। भूर्भुवः स्वः। ब्रह्म स्वयंभु। ब्रह्मणे स्वयंभु ॥२॥
वे स्वाहा २ वाग्घोता नव। ६। ब्राह्मण एक होता। स यज्ञः। स
मे ददातु प्रजां पशून्पुष्टिं यशः। यज्ञश्च मे भूयात्। अग्निर्द्विहोता।
स भर्ता स मे ददातु प्रजां पशून्पुष्टिं यशः। भर्ता च मे भूयात्।
पृथिवी त्रिहोता। स प्रतिष्ठा। स मे ददातु प्रजां पशून्पुष्टिं यशः।

प्रतिष्ठा च मे भूयात्। अंतरिक्षं चतुर्होता। स विष्ठाः। समेद्दा

तु प्रजां पशून्पुष्टिं यशः। विष्ठाश्च मे भूयात्। वायुः पंचहोता।

स प्राणः। समेद्दातु प्रजां पशून्पुष्टिं यशः। प्राणश्च मे भू

यात्। २। चंद्रमाः षड्ढोता। स ऋतून्कल्पयाति। समेद्दातु

प्रजां पशून्पुष्टिं यशः। ऋतवश्च मे कल्पंतां। अन्नं सप्तहो

ता। स प्राणस्य प्राणः। समेद्दातु प्रजां पशून्पुष्टिं यशः। प्राण

स्य च मे प्राणो भूयात्। द्यौरष्टहोता। सोनाधृष्यः। समेद्दातु

प्रजां पशून्पुष्टिं यशः। अनाधृष्यश्च भूयासं। आदित्यो नवहो

ता। स तेजस्वी। समेद्दातु प्रजां पशून्पुष्टिं यशः। तेजस्वी च भू

यासं। प्रजापतिर्दशहोता। स इदं सर्वं। समेद्दातु प्रजां

पशून्पुष्टिं यशः। सर्वं च मे भूयात्। ३। प्रतिष्ठा प्राणश्च मे भू

याद्नाधृष्यः सर्वेचमेभूयात्॥७॥ अग्निर्यजुर्भिः।सवि
तास्तोमैः।इंद्रउक्थामदैः।मित्रावरुणावाशिषा।अंगि
रसोधिष्णियैरग्निभिः।मरुतः सदोहविर्धानाभ्यां।आपः
प्रोक्षणीभिः।ओषधयोबर्हिषा।अदितिर्वेद्या।सोमोदी
क्षया॥१॥ त्वष्टेध्मेन।विष्णुर्यज्ञेन।वसवआज्येन।आदि
त्यादक्षिणाभिः।विश्वेदेवाऊर्जा।पूषास्वगाकारेण।
बृहस्पतिः पुरोधया।प्रजापतिरुद्गीथेन।अंतरिक्षंपवि
त्रेण।वायुःपात्रैः।अहंश्रद्धया॥२॥ दीक्षायापात्रैरे
कैश्च॥८॥ सेनेंद्रस्य।धेनाबृहस्पतेः।पथ्यापूष्णः।वा
ग्वायोः।दीक्षासोमस्य।पृथिव्यग्नेः।वसूनांगायत्री।रुद्रा

णांत्रिष्टुप्। आदित्यानांजगती। विष्णोरनुष्टुप्॥४॥ वरुण
स्यविराट्। यज्ञस्यपङ्क्तिः। प्रजापतेरनुमतिः। मित्रस्यश्र
द्धा। सवितुःप्रसूतिः। सूर्यस्यमरीचिः। चंद्रमसोरोहिणी। ऋ
षीणामरुंधती। पर्जन्यस्यविद्युत्। चतस्रोदिशः। चतस्रो
वांतरदिशाः। अहश्चरात्रिश्च। कृषिश्चवृष्टिश्च। त्विषि
श्चापचितिश्च। आपश्चौषधयश्च। ऊर्कंसूनृताचदेवता
नांपत्नयः॥५॥ अनुष्टुप्गिरिशःपट्‌चा॥९॥ देवस्यत्वासवितुः
प्रसवे। अश्विनोर्बाहुभ्यां। पूष्णोहस्ताभ्यांप्रतिगृह्णामि।
राजात्वावरुणोनयतुदेविदक्षिणेग्नयेहिरण्यं। तेनामृतत्व
मश्यां। वयोदात्रे। मयोमह्यमस्तुप्रतिग्रहीत्रे। कइदंकस्मा
अदात्। कामःकामाय। कामोदाता॥१॥ कामःप्रतिग्रहीता।

कामद्रूः समुद्रमाविश। कामेनत्वाप्रतिगृह्णामि। कामैतत्ते। एषा
ते कामदक्षिणा। उत्तानस्त्वांगीरसः प्रतिगृह्णातु। सोमाय वासः।
रुद्राय गां। वरुणायाश्वं। प्रजापतये पुरुषं। २। मनवे तल्पं। त्व
ष्ट्रेजां। पूष्णेविं। निर्ऋत्या अश्वतरगर्दभौ। हिमवते हस्तिनं।
गंधर्वाप्सराभ्यः स्रगलंकरणे। विश्वेभ्यो देवेभ्यो धान्यं। वा
चेन्नं। अन्नणओदनं। समुद्रायापः। ३। उत्तानायांगीरसा
यानः। वैश्वानराय रथं। वैश्वानरः प्रत्नथानाकमारुहत्।
दिवः पृष्ठं भंदमानः सुमन्मभिः। स पूर्ववज्जनयंजंतवे धनं।
समानमज्मापरियाति जागृविः। राज्ञात्वा वरुणोनयतु देवि
दक्षिणे वैश्वानराय रथं। तेनामृतत्वमश्यां। वयोदात्रे। म
योमह्यमस्तु प्रतिगृहीत्रे। ४। क इदं कस्मा अदात्। कामः

४ ४

कामः कामाय। कामोदाता। कामः प्रतिगृहीता। कामं ८: समु
द्रमाविश। कामेन त्वा प्रतिगृह्णामि। कामैतत्ते। ८ षाते काम
दक्षिणा। उत्तानस्त्वांगीरसः प्रतिगृह्णातु॥५॥ द्युतापुरुष
पापः प्रतिगृहीत्रेनवयाः॥१॥ सकृ वर्णघर्मं परिवेदवेनं। इंद्र
स्यात्मानंदशधाचरंतं। अंतः समुद्रे मनसा चरंतं। ब्रह्मान्वविं
दद्दशहोतारमर्णे। अंतः प्रविष्टः शास्ताजनानां। एकः सन्ब
हुधा विचारः। शतं शुक्राणि यत्रैकं भवंति। सर्वे वेदा यत्रै
कं भवंति। सर्वे होतारो यत्रैकं भवंति। समानसीन आत्माज
नानां॥१॥ अंतः प्रविष्टः शास्ताजनानां ८ सर्वात्मा। सर्वाः
प्रजा यत्रैकं भवंति। चतुर्होतारो यत्र संपदं गच्छंति देवैः। स
मानसीन आत्माजनानां। अहं [illegible] जगतः प्रतिष्ठा। दिव

-आत्मानं९ सवितारं बृहस्पतिं। चतुर्होतारं प्रदिशोनु कृप्तं।का
चो वीर्यं तिपसान्वविंदत्। अमृतः प्रविष्टं कृत्तीरमेतं चक्षुः
र९ सूर्यमग्निं चिकुर्वतं पिपूष्वि।।१।। अमृतस्य प्राणं यज्ञमेतं।
चतुर्होतृणामात्मानं कवयो निचिक्युः। अंतः प्रविष्टं कर्त्ता
र मेतं। देवानां बंधु निहितं गुहासु। अमृतेन क्लृप्तं यज्ञमेतं।
चतुर्होतृणामात्मानं कवयो निचिक्युः। शतं नियुतः परिवेद
विश्वा विश्ववारः। विश्वमिदं वृणाति। इंद्रस्यात्मा निहितः
पंचहोता। अमृतं देवानामायुः प्रजानां।।२।। इंद्र९ राजान९
सवितारमेतं। वायोरात्मानं कवयो निचिक्युः। रश्मि९ र
श्मीनां मध्ये तपंतं। ऋतस्य पदे कवयो निपांति।।३।। अ
ण्डकोशे भुवनं बिभर्ति। अनिर्भिन्नः सन्नथ लोकान्विच

५

श्री। यस्यां त्रिकोशा ८-पुष्पंमाटुः प्राणमुल्बं तेन कृतो मृतेना
ह मस्मि। सुवर्णकोशा ८-रजसा परीवृतं। देवानां वसुधानी
विराजा॥ प्राग्नमृतस्य कूर्वांनामुष्लाविवेष्टते। पाद ८-षट्
तुनकिलाविविल्से। येनेन्त्र्यै-पैन्नु शोतन्लु प्राः। उत वोषे ह्रै
ऱ्यामनुसोन कृ प्राः। न ८-षह्रोत्तार मनुभिः कल्पमानं। क्वे तस्य प्र
देकवयो नयंति॥ - श्रुतः प्रविंश्कृ नारिमोतं। - श्रुत नष्पं कृमसि
मनसा चरंतं॥ सुहैमसं तुन यिजानंति देवाः॥ इंद्रस्यात्मानं
शतधा चरंतं॥५॥ इंद्रो राजा जगतो य ईशे। सप्तहोतास प्तधा
विक्लृप्तः॥ परं कृतं तुं परि षिपुअमानं॥ - श्रुतराद्दित्यमनसा चरंतं॥
देवानां हृदयं ब्रह्मान्वविंदत्। ब्रह्मैतन्ब्रह्मण उज्जभार॥

अर्कुदः श्वोतंतंदःसरिरस्यमध्ये।=श्रायस्मिंस्तस्तपर्वः॥मेहंति
बकुलादः श्रियं। बिल्कस्य मिंद्रगोमती॥=प्रसुतां बकुलादः श्रि
यं॥सहरिर्वसुवितेम॥पेरुरिंद्रायपिन्वते॥वृक्षुश्वो मिंद्र
गोमती।=प्रसुतां बकुलादः श्रियं।महपिंद्रा नियच्छतु॥श्रातं
शाताः प्रस्यपुत्रा हरीणां॥=प्रवीडायां वसुभीः श्रिमरिंद्रः॥
प्रसदः हमाणो बकुलाश्रियं॥इन्द्रमरिंद्रः सवितानामेनियच्छ
तु॥७॥धृतं तेजोमधुमद्धिरिंद्रियं॥मय्ययमग्निर्दधातु॥हरिः
पतंगः पटरीसुपर्णा॥दिविक्षयो नभसायएतिं॥सनइंद्रः
कामवरंददातु॥पंचारं चक्रं परिवर्तते पृथु। हिरण्यज्यो

तिः सरिरस्याम ध्ये। अजेस्रं ज्योतिर्नभसा सर्पदेति। सनः इं
द्रः कामवरं ददातु। सप्त युंजंति रथमेकचक्रं। ८। एको अ
श्वो वहति सप्तनामा। त्रिनाभि चक्रमजरमनर्वं। येना मावि
श्वा भुवनानि तस्थुः। भद्रं पश्यंत उपसेदुरग्रे। तपो दीक्षामृ
षयः सुवर्विदः। ततः क्षत्रं बलमोजश्च जातं। तदस्मै देवा अभि
संनमंतु। श्वेतं रश्मिं बोभुज्यमानं। अपां नेतारं भुवनस्य गो
पां। इंद्रं निचिक्युः परमे व्योमन्॥ ९॥ रोहिणीः पिंगला एकरूपाः।
क्षरंतीः पिंगला एकरूपाः। शतं सहस्राणि प्रयुतानि नाव्या
नां। अयं यः श्वेतो रश्मिः। परि सर्वमिदं जगत्। प्रजां पशून् धना
नि। अस्माकं ददातु। श्वेतो रश्मिः परि सर्वं बभूव। सुवन्मह्यं
पशून् विश्वरूपान्। पतंगमक्तमसुरस्य मायया॥ १०॥ हृदा पश्य

न्ति मनसा मनीषिणः । समुद्रे अन्तः कवयो नि चक्षते । मरीचीनां
पदमिच्छन्ति वेधसः । पतंगो वाचं मनसा बिभर्ति । तां गंधर्वोवदद्ग
र्भे अन्तः । तां द्योतमानां स्वर्यं मनीषां । ऋतस्य पदे कवयो नि
पांति । ये ग्राम्याः पशवो विश्वरूपाः । विरूपाः संतो बहुधैकरू
पाः । अग्निस्तां अग्रे प्रमुमोक्तु देवः ॥ ४१ ॥ प्रजापतिः प्रजया
संविदानः । वीतं स्तोके स्तोके । युवमस्मासु नियच्छतं । प्रप्रयु
ज्ञपतिं तिर । ये ग्राम्याः पशवो विश्वरूपाः । विरूपाः संतो बहुधै
करूपाः । तेषां सप्तानामिह रंतिरस्तु । रायस्पोषाय सुप्रजास्त्वा
य सुवीर्याय । ये आरण्याः पशवो विश्वरूपाः । विरूपाः संतो बहु
धैकरूपाः । वायुस्तां अग्रे प्रमुमोक्तु देवाः । प्रजापतिः प्रजया
संविदानः । इडायै सृप्तं घृतवच्चराचरं । देवा अन्वविंदन्गुहा

हितं। य॰ आरण्याः पशवो विश्वरूपाः। विरूपाः संतो बहुधैकरूपाः।
तेषा॰ सप्तानामिह रंतिरस्तु। रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय॥
॥१२ आत्मा जनानां विकुर्वंतं विपश्चिं प्रजानां वसुधानीं विराजं वरंतं
गोमंतीमे नियच्छ त्वेके वक्रं व्योमन्मायया देव एकरूपाश्रयो व ११
सहस्रशीर्षा पुरुषः। सहस्राक्षः सहस्रपात्। स भूमिं विश्वतो वृत्वा।
अत्यतिष्ठद्दशांगुलं। पुरुष एवेदं सर्वं। यद्भूतं यच्च भव्यं। उतामृत
त्वस्येशानः। यदन्नेनातिरोहति। एतावानस्य महिमा। अतो ज्यायांश्
च पूरुषः। १ पादोस्य विश्वा भूतानि। त्रिपादस्यामृतं दिवि। त्रिपादू
र्ध्व उदैत्पुरुषः। पादोस्येहाभवत्पुनः। ततो विष्वङ् व्यक्रामत्। साश
नानशने अभि। तस्माद्विराळजायत। विराजो अधि पूरुषः। स जातो
अत्यरिच्यत। पश्चाद्भूमिमथो पुरः। २ यत्पुरुषेण हविषा। देवा य
ज्ञमतन्वत। वसंतो अस्यासीदाज्यं। ग्रीष्म इध्मः शरद्धविः। सप्तास्या
सन्परिधयः। त्रिः सप्त समिधः कृताः। देवा यद्यज्ञं तन्वानाः। अबध्न

पुरुषं पशुं। तंयज्ञं बर्हिषि प्रौक्षन्। पुरुषंजातमग्रतः। तेनदे
वा अयजंत। साध्या ऋषयश्चये। तस्माद्यज्ञात्सर्वहुतः। संभृ
तं पृषदाज्यं। पशू २ स्तां २ श्चक्रे वायव्यान्। आरण्यान्ग्राम्या
श्चये। तस्माद्यज्ञात्सर्वहुतः। ऋचः सामानिजज्ञिरे। छंदां २ सि
जज्ञिरे तस्मात्। यजुस्तस्मादजायत ४ तस्मादश्वा अजायंत।
ये के चोभयादतः। गावो ह जज्ञिरे तस्मात्। तस्माज्जाता अजावयः।
यत्पुरुषं व्यदधुः। कतिधा व्यकल्पयन्। मुखं किमस्य कौ बाहू।
का ऊरू पादावुच्येते। ब्राह्मणोस्य मुखमासीत्। बाहू राजन्यः
कृतः। ५ ऊरू तदस्य यद्वैश्यः। पद्भ्यां २ शूद्रो अजायत। चंद्र
मा मनसो जातः। चक्षोः सूर्यो अजायत। मुखादिंद्रश्चाग्निश्च।
प्राणाद्वायुरजायत। नाभ्या आसीदंतरिक्षं। शीर्ष्णो द्यौः समव
र्तत। पद्भ्यां भूमिर्दिशः श्रोत्रात्। तथा लोकां २ अकल्पयन्।

६ वेदाहमेतंपुरुषंमहांतं। आदित्यवर्णंतमसस्तुपारे। सर्वाणि
रूपाणिविचित्यधीरः। नामानिकृत्वाभिवदन्यदास्ते। धातापुर
स्ताद्यमुदाजहार। शक्रः प्रविद्वान्प्रदिशश्चतस्रः। तमेवंविद्वान
मृतइहभवति। नान्यः पंथाअयनायविद्यते। यज्ञेनयज्ञमयज
तदेवाः। तानिधर्माणिप्रथमान्यासन्। तेहनाकंमहिमानःसचंते।
यत्रपूर्वेसाध्याःसंतिदेवाः। १ पुरुषःपुरोयतोजायत द्वैलोकल्पय
न्नासंद्वैच। १२ अद्भ्यः संभृतः पृथिव्यैरसाच्च। विश्वकर्मणःस
मवर्त्ततांधि। तस्यत्वष्टाविदधद्रूपमेति। तत्पुरुषस्यविश्वमाजान
मग्रे। वेदाहमेतंपुरुषंमहांतं। आदित्यवर्णंतमसःपरस्तात्। तमे
वंविद्वानमृतइहभवति। नान्यः पंथाविद्यतेऽयनाय। प्रजापतिश्चरं
तिगर्भेअंतः। अजायमानोबहुधाविजायते। १ तस्यधीराःपरि
जानंतियोनिं। मरीचीनांपदमिच्छंतिवेधसः। योदेवेभ्यआतपति।

योदेवानांपुरोहितः। पूर्वोयोदेवेभ्योजातः। नमोरुचायब्राह्मये।
रुचंब्राह्मंजनयंतः। देवाअग्रेतदब्रुवन्। यस्त्वैवंब्राह्मणोविद्यात्।
त्तस्यदेवाअसन्वशे। ह्रीश्चतेलक्ष्मीश्चपत्न्यौ। अहोरात्रेपार्श्वे।
नक्षत्राणिरूपं। अश्विनौव्यात्तं। इष्टंमनीषाण। अमुंमनिषाण।
सर्वंमनिषाण। २ जायतेवशोसुपत्व। १३ भर्त्तासन्भ्रियमाणो
बिभर्त्ति। एकोदेवोबहुधानिविष्टः। यदाभारंतंदयतेसभर्त्तुं।
निधायभारंपुनरस्तमेति। तमेवमृत्युममृतंतमाहुः। तंभर्त्तारं
तमुगोप्तारमाहुः। सभृतोभ्रियमाणोबिभर्त्ति। यएनंवेदसत्ये
नभर्त्तुं। सद्योजातमुतजहात्येषः। उतोजरंतंनजहात्येकं। १ उ
तोबहूनेकमहर्जभार। अतंद्रोदेवः सदमेवप्रार्थः। यस्तद्वेद्य
तंत्रावभस्व। संधीवपाटू संदधेब्रह्मलोकं। रमतेतस्मिन्नुतजी
र्णेशयाने। नैनंजहत्यहः सुपूर्वेषु। त्वामापोअनुसर्वाश्चरंति
जानतीः। वत्संपयसापुनानाः। त्वमग्निंहव्यवाहंसमिन्त्से।
त्वंधाताविश्वाप्रजानां २ त्वंयज्ञस्त्वमुवेवासिसोमः। त्वंदे

याहवमायंतिसर्वे। त्वमेकोसिबहूननुप्रविष्टः। नमस्तेअस्तसुह
वोमएधि। नमोवामस्तुशृणुतं हवं मे। प्राणापानावजिरं सं
चरंतौ। ह्वयामियां ब्रह्मणा तूर्तमेतं। योमांद्वेष्टितं जहितं युवाना।
प्राणापानौसंविदानौजहितं। अमुष्यासुनामासंगसाथां। २ तंमे
देवाब्रह्मणासंविदानौ। वधायदत्तंतमहं हनामि। असज्जजान
सतआबभूव। यंयंजजानसउगोपोअस्य। यदाभारंतंद्रयतेसभ
र्तुं। परास्यभारंपुनरस्तमेति। तद्वैत्वंप्राणोअभवः। महान्भोगः प्रजा
पतेः। भुजः करिष्यमाणः। यद्देवान्प्राणयोनव। ४ एकंप्रजानांग
साधानव। ५ हरिः हरंतमनुयंतिदेवाः। विश्वस्येशानंवृषभं
मतीनां। ब्रह्मसरूपमनुमेदमागात्। अयनंमाविवधीर्विक्रमस्व।
माच्छिदोमन्योमावधीः। मामेबलंविवृहोमाप्रमोषीः। प्रज्ञांमामेरीरि
षआयुरुग्र। नृचक्षसंत्वाहविषाविधेम। सद्यश्चक्रमाणाय। प्रवेपा
नायमृत्यवे। १ प्रास्माआशाअशृण्वन्। कामेनाजनयन्पुनः।
कामेनमेकामआगात्। हृदयाद्धृदयंमृत्योः। यदमीषामदः

१०

प्रियं। तदेतूपमामभि। परं मृत्यो अनुपरेहि पंथां। यस्ते स्वइत
रो देवयानात्। चक्षुष्मते शृण्वते ते ब्रवीमि। मा नः प्रजां रीरिषो
मोत वीरान्। प्रपूर्व्यं मनसा वंदमानः। नाधमानो वृषभं चर्षणीनां।
यः प्रजानामेकराण्मानुषीणां। मृत्युं यजे प्रथमजामृतस्य। २ ॥
त्यवेधीरा ८ श्वेत्वारिंश। १५ तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सू
र्य। विश्वमाभासि रोचनं। उपयामगृहीतोसि सूर्याय त्वा भ्राजस्व
त एष ते योनिः सूर्याय त्वा भ्राजस्वते। १६ आप्यायस्व मदिंत
म सोम विश्वाभिरूतिभिः। भवा नः सप्रथस्तमः। १७ ईयुष्टे ये
पूर्वतरामपश्यन्व्युच्छंतीमुषसं मर्त्यासः। अस्माभिरू नु प्रतिचक्ष्या
भूदो ते यंति ये अपरीषु पश्यान्। १८ ज्योतिष्मतीं त्वा सादयामि ज्यो
तिष्कृतं त्वा सादयामि ज्योतिर्विदं त्वा सादयामि भास्वतीं त्वा सादया
मि ज्वलंतीं त्वा सादयामि मल्मलाभवंतीं त्वा सादयामि दीप्यमानां
त्वा सादयामि रोचमानां त्वा सादयाम्यजस्रां त्वा सादयामि बृहज्
ज्योतिषं त्वा सादयामि बोधयंतीं त्वा सादयामि जाग्रतीं त्वा सादया

१०

मि १९ प्रयासायस्वाहा यासायस्वाहा वियासायस्वाहा संयासायस्वा
हो द्यासायस्वाहा वयासायस्वाहा शुचेस्वाहा शोकायस्वाहा तप्यत्वै
स्वाहा तपसेस्वाहा ब्रह्महत्यायैस्वाहा सर्वस्मै स्वाहा २० विल्ल संताने
नभवं पक्कारुद्रेनानिम्नापशुपति स्थूल हृदयेमाग्नि हृदयेनरु
द्रं लोहितेनशर्वमतस्नाभ्यां महादेवमंत पार्श्वे नौषि छहन शिंगी
कोश्याभ्यां २१ चित्तिः पृथिव्यग्निः सूर्यंते चक्षुर्महा हाहविर्हैलो वाग्धो
ताब्राह्मणएकहोताग्निर्यज्ञुर्भिः सेनेंद्रस्य देवस्यसुवर्णघर्म सहस्त्र
शीर्षाद्योमन्तोहरितरणिराप्यायस्वयुञ्जे ज्योतिष्मती प्रयासाय वि
नमेकवि शांति १० ॐभू तच्छंयोरावृणीमहे । गातुंयज्ञाय । गा
तुंयज्ञपतये । दैवीस्वस्तिरस्तुनः । स्वस्तिर्मानुषेभ्यः । ऊर्ध्वंजिगातु भे
षजं । शन्नो अस्तु द्विपदे । शंचतुष्पदे । ओं शांतिः शांतिः शांतिः
श्रीकृष्ण ० हरिः ॐभूः शन्नोमित्रः शंवरुणः । शन्नोभवत

र्यमा। शन्नऽइंद्रो बृहस्पतिः। शन्नो विष्णुरुरुक्रमः। नमो ब्रह्मणे।
नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि। त्वमेव प्रत्यक्षं ब्रह्म वदिष्या
मि। ऋतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु। तद्वक्तारमवतु
अवतु मां। अवतु वक्तारं। ॐ शांतिः शांतिः शांतिः। ओम्। शीक्षां व्या
ख्यास्यामः। वर्णस्वरः। मात्रा बलं। साम संतानः। इत्युक्तः शीक्षाध्या
यः। १। शीक्षापर्व १। सह नौ यशः। सह नौ ब्रह्मवर्चसं। अथातः सं
हितायाउपनिषदं व्याख्यास्यामः। पंचस्वधिकरणेषु। अधिलो
कमधिज्योतिषमधिविद्यमधिप्रजमध्यात्मं। ता महासंहिता इत्याच
क्षते। अथाधिलोकं। पृथिवी पूर्वरूपं द्यौरुत्तररूपं आकाशः संधिः ११
वायुः संधानं इत्यधिलोकं अथाधिज्योतिषं अग्निः पूर्वरूपं आ
दित्य उत्तररूपं आपः संधिः वैद्युतः संधानं इत्यधिज्योतिषं अ
थाधिविद्यं आचार्यः पूर्वरूपं २ अंतेवास्युत्तररूपं विद्यासंधिः

प्रवचनं संधानं इत्यधिविद्यं अथाधिप्रजं माता पूर्वरूपं पितोत्त
ररूपं प्रजासंधिः प्रजननं संधानं इत्यधिप्रजं ३ अथाध्यात्मं
अधराहनुः पूर्वरूपं उत्तरहनुरुत्तररूपं वाक्संधिः जिह्वासंधानं इ
त्यध्यात्मं इतीमामहासंहिताः यएवमेतामहासंहिताव्याख्यातावेद
संधीयते प्रजया पशुभिः ब्रह्मवर्चसेनान्नाद्येन सुवर्ग्येण लोकेन ४ संधि
राचार्यः पूर्वरूपमित्यधिप्रजं लोकेन १ यश्छंदसामृषभो विश्वरूपः छं
दोभ्योऽध्यमृतात्संबभूव। समेंद्रो मेधयास्पृणोतु अमृतस्य देवधारणो भू
यासं शरीरं मे विचर्षणं जिह्वा मे मधुमत्तमा कर्णाभ्यां भूरिविश्रुवं ब्रह्म
णः कोशोऽसि मेधया पिहितः श्रुतं मे गोपाय आवहंती वितन्वाना १ कु
र्वाणाचीरमात्मनः वासांसि मम गावश्च अन्नपाने च सर्वदा, ततो मे
श्रियमावह लोमशां पशुभिः सह स्वाहा आमायंतु ब्रह्मचारिणः स्वाहा
विमायंतु ब्रह्मचारिणः स्वाहा प्रमायंतु ब्रह्मचारिणः स्वाहा दमायंतु

१२

ब्रह्मचारिणः स्वाहा शमायंतुब्रह्मचारिणः० २ यशोजनेसानि स्वा०
श्रेयान्वस्यसोसानिः स्वाहा तंत्वाभगप्रविशानिः स्वाहा समाभगप्र
विशः स्वाहा तस्मिन्सहस्रशाखे निभगाहंत्वयिमृजेस्वाहा यथापःप्र
वतायंति यथामासाअहर्जरं एवंमांब्रह्मचारिणः धातरायंतुसर्वतः
स्वाहा प्रतिवेशोसि प्रमाभाहि प्रमापद्यस्व २ वितन्वानाशमायंतुब्र
ह्मचारिणः स्वाहा धातरायंतुसर्वतः स्वाहेकंच २ भूर्भुवसुवरितिवाए
तोस्तिस्रोव्याहृतयः तासामुहस्मैतांचतुर्थीं माहाचमस्यः प्रवेदयते
महइति तद्ब्रह्म सआत्मा अंगान्यन्यादेवताः भूरितिवाअयंलोकः
भुवइत्यंतरिक्षं सुवरित्यसौलोकः १ महइत्यादित्यः आदित्येन
वावसर्वेलोकामहीयंते भूरितिवाअग्निः भुवइतिवायुः सुवरि
त्यादित्यः महइतिचंद्रमाः चंद्रमसावावसर्वाणिज्योतींषिमहीयंते
भूरितिवाऋचः भुवइतिसामानि सुवरितियजूंषि २ महइति
ब्रह्म ब्रह्मणावावसर्वेवेदामहीयंते भूरितिवैप्राणः भुवइत्यपानः

१२

रुवरितिव्यानः । मह इत्यन्नं । अन्नेन वाव सर्वे प्राणा महीयन्ते । ता वा एताः
श्चतस्रश्चतुर्धा । चतस्रश्चतस्रो व्याहृतयः । ता यो वेद । स वेद ब्रह्म । सर्वे
स्मै देवा बलिमावहन्ति । ३ असौ लोको यजूंषि वेद द्वे च । ४ स य एषो
न्तर हृदय आकाशः । तस्मिन्नयं पुरुषो मनोमयः । अमृतो हिरणमयः । अ
न्तरेण तालुके । य एष स्तन इवावलम्बते । सेन्द्रयोनिः । यत्रासौ केशान्तो वि
वर्तते । व्यपोह्य शीर्षकपाले । भूरित्यग्नौ प्रतितिष्ठति । भुव इति वायौ । सु
वरित्यादित्ये । मह इति ब्रह्मणि । आप्नोति स्वाराज्यं । आप्नोति मनसस्प
तिं । वाक्पतिश्चक्षुष्पतिः । श्रोत्रपतिर्विज्ञानपतिः । एतत्ततो भवति । आका
शशरीरं ब्रह्म । सत्यात्म प्राणारामं मन आनन्दं । शान्तिसमृद्धममृतं । इति प्रा
चीनयोग्योपास्स्व । २ । वायावमृतमेकं च । ५ पृथिव्यन्तरिक्षं द्यौर्दिशोऽवा
न्तरदिशाः । अग्निर्वायुरादित्यश्चन्द्रमा नक्षत्राणि । आप ओषधयो व
नस्पतय आकाश आत्मा । इत्यधिभूतं । अथाध्यात्मं । प्राणो व्यानो
पान उदानः समानः । चक्षुः श्रोत्रं मनो वाक् त्वक् । चर्म मांसं स्ना

वाख्छिमज्जा । एतदधिविधाय ऋषिरवोचत् । पाङ्क्तं वा इद॒ सर्वं । पा
ङ्क्तेनैव पाङ्क्त॒ स्पृणोतीति । १ । सर्वमेकं च । ६ । ओमिति ब्रह्म । ओमिती
द॒ सर्वं । ओमित्येतदनुकृतिह स्म वा । अप्योश्रावयेत्याश्रावयन्ति ।
ओमिति सामानि गायन्ति । ओ॒ शोमिति शस्त्राणि श॒ंसन्ति । ओ
मित्यध्वर्युः प्रतिगरं प्रतिगृणाति । ओमिति ब्रह्मा प्रसौति । ओ
मित्यग्निहोत्रमनुजानाति । ओमिति ब्राह्मणः प्रवक्ष्यन्नाह ब्रह्मो
पाप्नवानीति । ब्रह्मैवोपाप्नोति । १ । ओंदशः । ८ । ऋतं च स्वाध्यायप्र
वचने च । सत्यं च स्वाध्यायप्रवचने च । तपश्च स्वाध्यायप्रवचने च । द
मश्च स्वाध्यायप्रवचने च । शमश्च स्वाध्यायप्रवचने च । अग्नयश्च स्वा
ध्यायप्रवचने च । अग्निहोत्रं च स्वाध्यायप्रवचने च । अतिथयश्च स्वा
ध्यायप्रवचने च । मानुषं च स्वाध्यायप्रवचने च । प्रजा च स्वाध्यायप्रव
चने च । प्रजनश्च स्वाध्यायप्रवचने च । प्रजातिश्च स्वाध्यायप्रवचने च
सत्यमिति सत्यवचा राथीतरः । तप इति तपोनित्यः पौरुशिष्टिः । स्वा

ध्यायप्रवचने। एवेतिनाको मौद्गल्यः। तद्धि तपस्तद्धि तपः। ९। प्रजा
वस्वाध्यायप्रवचने च। षट् च। ९। अहं वृक्षस्य रेरिवा। कीर्तिः पृष्ठं
गिरेरिव। ऊर्ध्वपवित्रो वाजिनीव स्वमृतमस्मि। द्रविणं सवर्चसं।
सुमेधा अमृतोक्षितः। इति त्रिशंकोर्वेदानुवचनं। १। अहं षट्
१० वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति। सत्यं वद। धर्मं चर। स्वाध्या
यान्मा प्रमदः। आचार्याय प्रियं धनमाहृत्य प्रजातंतुं मा व्यवच्छे ह
त्सीः। सत्यान्न प्रमदितव्यं। धर्मान्न प्रमदितव्यं। कुशलान्न प्रमदि
तव्यं। भूत्यै न प्रमदितव्यं। स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यं। १
देवपितृकार्याभ्यां न प्रमदितव्यं। मातृदेवो भव। पितृदेवो भव। आ
चार्यदेवो भव। अतिथिदेवो भव। यान्यनवद्यानि कर्माणि। तानि
व्या सेवितव्यानि। नो इतराणि। यान्यस्माकं सुचरितानि। तानि त्वयो
पास्यानि। २ नो इतराणि। ये के चास्मच्छ्रेयांसो ब्राह्मणाः। तेषां त्व
यासनेन प्रश्वसितव्यं। श्रद्धया देयं। अश्रद्धयादेयं। श्रिया देयं। ह्रि

27

यादेयं भियादेयं संविदादेयं। अथ यदि ते कर्मविचिकित्सा वा वृत्त कि
कि विचिकित्सा वा स्यात्॥ ये तत्र ब्राह्मणाः संमर्शिनः। युक्ता आयुक्ताः।
अलूक्षा धर्मकामास्युः। यथा ते तत्र वर्तेरन्। तथा तत्र वर्तेथाः॥
अथाभ्याख्यातेषु। ये तत्र ब्राह्मणाः संमर्शिनः। युक्ता आयुक्ताः। अ
लूक्षा धर्मकामास्युः। यथा ते तेषु वर्तेरन्। तथा तेषु वर्तेथाः। एष आ
देशः। एष उपदेशः। एषा वेदोपनिषत्। एतदनुशासनं। एवमुपा
सितव्यं एवमु चैतदुपास्यं॥ ४ स्वाध्यायप्रवचनाभ्यां न प्रमदित १४
१४ व्यं। तानित्वयोपास्यानि स्यात्। तेषु वर्तेरन्स मच। शंनो मित्रः
शं वरुणः। शन्नो भवत्वर्यमा। शंन इन्द्रो बृहस्पतिः। शंनो वि
ष्णुरुरुक्रमः। नमो ब्रह्मणे। नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि।
त्वामेव प्रत्यक्षं ब्रह्मावादिषं। ऋतमवादिषं सत्यमवादिषं त
न्मामावीत्॥ तद्वक्तारमावीत्। आवीन्मां आवीद्वक्तारं ओं

ॐ शांतिः शांतिः शांतिः । इति शीक्षा । सहनौ यश्छंदसा । भूर्भुवः
सेयं पृथिव्योमित्यृतं चाहयेदमनूच्य शंनो द्वादश । शन्नोमह
इत्यादि योनो इतराणि त्रयोविंशतिः ॥ हरिः ओम् । सहनाव
वतु सहनौ भुनक्तु सहवीर्यं करवावहै तेजस्विनावधीतमस्तु मा
विद्विषावहै ॐ शांतिः शांतिः शांतिः ओम् । ब्रह्मविदाप्नो
तिपरं तदेषाभ्युक्ता सत्यंज्ञानमनंतंब्रह्म । योवेदनिहितंगु
हायापरमेव्योमन् सोश्नुते सर्वान्कामान्सह ब्रह्मणाविपश्चिते
ति तस्माद्वा एतस्मादात्मन आकाशः संभूतः । आकाशाद्वायुः
वायोरग्निः अग्नेरापः अद्भ्यः पृथिवी पृथिव्या ओषधयः
ओषधीभ्योन्नं अन्नात्पुरुषः । सवाएषपुरुषोन्नरसमयः तस्ये
दमेवशिरः अयंदक्षिणः पक्षः अयमुत्तरः पक्षः अयमात्मा ।
इदंपुच्छंप्रतिष्ठा तदप्येषश्लोकोभवति १ अन्नाद्वैप्रजाः प्र

जायंते। याः काश्च पृथिवीं श्रिता। अथो अन्नेनैव जीवंति। अ
थैनदपियंत्यंततः अन्नं हि भूतानां ज्येष्ठं। तस्मात्सर्वौषधमु
च्यते। सर्वं वै ते न्नमाप्नुवंति। येन्नं ब्रह्मोपासते। अन्नं हि भूता
नां ज्येष्ठं। तस्मात्सर्वौषधमुच्यते १ अन्नाद्भूतानि जायंते जा
तान्यन्नेन वर्धंते अद्यतेत्ति च भूतानि। तस्मादन्नं तदुच्यत इति
तस्माद्वा एतस्मादन्नरसमयात्। अन्योंतर आत्मा प्राणमयः।
तेनैष पूर्णः। स वा एष पुरुषविध एव। तस्य पुरुषविधतां। अन्व
यं पुरुषविधः। तस्य प्राण एव शिरः। व्यानो दक्षिणः पक्षः। अपा
न उत्तरः पक्षः। आकाश आत्मा। पृथिवी पुच्छं प्रतिष्ठा। तदप्येष
श्लोको भवति १ प्राणं देवा अनु प्राणंति। मनुष्याः पशवश्च ये
प्राणो हि भूतानामायुः तस्मात्सर्वायुषमुच्यते सर्वमेव त आयु
र्यंति ये प्राणं ब्रह्मोपासते प्राणो हि भूतानामायुः। तस्मात्सर्वा
युषमुच्यते सर्वमेव त आयुर्यंति ये प्राणं ब्रह्मोपासते प्राणो हि भूता

९५

४ युषमुच्यतइति तस्यैषएवशारीरआत्मा यः पूर्वस्य तस्मा
द्वाएतस्मात्प्राणमयात् । अन्योंतरआत्मामनोमयः तेनैषपूर्णः ।
सवाएषपुरुषविधएव तस्यपुरुषविधतां अन्वयंपुरुषविधः ।
तस्ययजुरेवशिरः ऋग्दक्षिणः पक्षः सामोत्तरपक्षः आदेशआ
त्मा अथर्वांगिरसः पुछंप्रतिष्ठा तदप्येषश्लोकोभवति ॥ य
तोवाचोनिवर्त्तंते अप्राप्यमनसासह । आनंदंब्रह्मणोविद्वा
न् नबिभेतिकदाचनेति । तस्यैषएवशारीरआत्मा यः पूर्व
स्य तस्माद्वाएतस्मान्मनोमयात् । अन्योंतरआत्माविज्ञानम
यः तेनैषपूर्णः सवाएषपुरुषविधएव तस्यपुरुषविधतां अ
न्वयंपुरुषविधः तस्यश्रद्धैवशिरः । ऋतंदक्षिणः पक्षः सत्य
मुत्तरः पक्षः योगआत्मा महः पुच्छंप्रतिष्ठा । तदप्येषश्लोको

भवति ४ विज्ञानयज्ञंतनुते। कर्माणितनुतेपिच। विज्ञानंदेवाः
सर्वे ब्रह्मज्येष्ठमुपासते। विज्ञानंब्रह्मचेद्वेद। तस्माच्चेन्नप्रमा
द्यति शरीरेपाप्मनोहित्वा सर्वान्कामान्समश्नुतइति तस्यै
षएवशारीरआत्मा यः पूर्वस्य तस्माद्वाएतस्माद्विज्ञानमयात्
अन्योंतरआत्मानंदमयः तेनैषपूर्णः सवाएषपुरुषविधएव
तस्यपुरुषविधतां अन्वयंपुरुषविधः तस्यप्रियमेवशिरः
मोदोदक्षिणःपक्षः प्रमोदउत्तरःपक्षः आनंदआत्मा ब्र
ह्मपुच्छंप्रतिष्ठा तदप्येषश्लोकोभवति ५ असन्नेवसभवति। १६
असद्ब्रह्मेतिवेदचेत् अस्तिब्रह्मेतिचेद्वेद संतमेनंततोवि
दुरिति तस्यैषएवशारीरआत्मा यः पूर्वस्य अथातोनुप्र
श्नाः उताविद्वानमुंलोकंप्रेत्य कश्चनगच्छती३ आहोविद्वा
न्मुंलोकंप्रेत्य। कश्चित्समश्नुता३उ सोकामयत। बहुस्यांप्र

१६

जायेयेति । स तपोऽतप्यत । स तपस्तप्त्वा । इदꣳ सर्वमसृजत । यदि-
दं किंच । तत्सृष्ट्वा । तदेवानुप्राविशत् । तदनुप्रविश्य । सच्च त्यच्चाभ-
वत् । निरुक्तं चानिरुक्तं च । निलयनं चानिलयनं च । विज्ञानं चावि-
ज्ञानं च । सत्यं चानृतं च सत्यमभवत् । यदिदं किंच । तत्सत्यमित्या-
चक्षते । तदप्येष श्लोको भवति । ६ । असद्वा इदमग्र आसीत् । ततो वै
सदजायत । तदात्मानꣳ स्वयमकुरुत । तस्मात्तत्सुकृतमुच्यत इति ॥
यद्वै तत्सुकृतं । रसो वै सः । रसꣳ ह्येवायं लब्ध्वानंदी भवति । को ह्ये-
वान्यात्कः प्राण्यात् । यदेष आकाश आनंदो न स्यात् । एष ह्येवानं-
दयाति । यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रति-
ष्ठां विंदते । अथ सोऽभयं गतो भवति । यदा ह्येवैष एतस्मिन्नुदरमं-
तरं कुरुते । अथ तस्य भयं भवति । तत्त्वेव भयं विदुषोऽमन्वानस्य । त

द्यषशोको भवति ॥७॥ भीषास्माद्वातः पवते ॥ भीषोदेति सू
र्यः ॥ भीषास्मादग्निश्चेंद्रस्य ॥ मृत्युर्धावति पंचम इति ॥ सैषानंद
स्य मीमांसा भवति ॥ युवास्यात्साधुयुवाध्यायकः ॥ आशिष्ठो
दृढिष्ठो बलिष्ठः ॥ तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यात् ॥ स ए
को मानुष आनंदः ॥ ते ये शतं मानुषा आनंदाः ॥ स एको मनुष्यगं
धर्वाणामानंदः ॥ श्रोत्रियस्य चाकामहतस्य ॥ ते ये शतं मनुष्यगंध
र्वाणामानंदाः ॥ स एको देवगंधर्वाणामानंदः ॥ श्रोत्रियस्य चाकाम
हतस्य ॥ ये ते शतं देवगंधर्वाणामानंदाः ॥ स एकः पितृणां चिर
लोकलोकानामानंदः ॥ श्रोत्रियस्य चाकामहतस्य ॥ ये ते शतं पि
तृणां चिरलोकलोकानामानंदाः ॥ स एक आजानजानां देवाना
मानंदः ॥ श्रोत्रियस्य चाकामहतस्य ॥ ये ते शतमाजानजानां दे
वानामानंदाः ॥ स एकः कर्मदेवानां देवानामानंदः ॥ ये कर्मणा दे

34

वानपियंति ॥ श्रोत्रियस्यचाकामहतस्य ॥ येतेशतंकर्मदेवानांदेवा
नामानंदाः ॥ सएकोदेवानामानंदः ॥ श्रोत्रियस्यचाकामहतस्य ॥ ये
तेशतंदेवानामानंदाः ॥ सएकइंद्रस्यानंदः ॥ श्रोत्रियस्यचाकामह
तस्य ॥ येतेशतमिंद्रस्यानंदाः ॥ सएकोबृहस्पतेरानंदः ॥ श्रोत्रिय
स्यचाकामहतस्य ॥ येतेशतंबृहस्पतेरानंदाः ॥ सएकःप्रजापतेरा
नंदः ॥ श्रोत्रियस्यचाकामहतस्य ॥ येतेशतंप्रजापतेरानंदाः ॥ सए
कोब्रह्मणआनंदः ॥ श्रोत्रियस्यचाकामहतस्य ॥ सयश्चायंपुरु
षे ॥ यश्चासावादित्ये ॥ सएकः ॥ सयएवंवित् ॥ अस्माल्लोकात्प्रेत्य ॥
एतमन्नमयमात्मानमुपसंक्रामति ॥ एतंप्राणमयमात्मानमुपसं
क्रामति ॥ एतंमनोमयमात्मानमुपसंक्रामति ॥ एतंविज्ञानमयमा
त्मानमुपसंक्रामति ॥ एतमानंदमयमात्मानमुपसंक्रामति ॥ तदप्ये
षश्लोकोभवति ॥ ९ ॥ यतोवाचोनिवर्तंते ॥ अप्राप्यमनसासह ॥ आ

नंदं ब्रह्मणो विद्वान् ॥ न बिभेति कुतश्चनेति ॥ एतꣳ ह वाव न तपति ॥
किमहꣳ साधु नाकरवं ॥ किमहं पापमकरवमिति ॥ स य एवं विद्वा
नेते आत्मानꣳ स्पृणुते ॥ उभे ह्येवैष एते आत्मानꣳ स्पृणुते ॥ यः
एवं वेद ॥ इत्युपनिषत् ॥ ९ ॥ सह नाववतु ॥ सह नौ भुनक्तु ॥ सह वी
र्यं करवावहै ॥ तेजस्वि नावधीतमस्तु मा विद्विषावहै ॥ ॐ शांतिः
शांतिः शांतिः ॥ ७ ॥ हरिः ॐ ॥ भृगुर्वै वारुणिः ॥ वरुणं पितर
॥ १० ॥ मुपससार ॥ अधीहि भगवो ब्रह्मेति ॥ तस्मा एतत्प्रोवाच ॥ अन्नं ॥ १० ॥
प्राणं चक्षुः श्रोत्रं मनो वाचमिति ॥ तꣳ होवाच ॥ यतो वा इमानि भू
तानि जायंते ॥ येन जातानि जीवंति ॥ यत्प्रयंत्यभिसंविशंति ॥ तद्वि
जिज्ञासस्व ॥ तद्ब्रह्मेति ॥ स तपोतप्यत ॥ स तपस्तप्त्वा ॥ अन्नं ब्रह्मे ॥ १ ॥
ति व्यजानात् ॥ अन्नाद्ध्येव खल्विमानि भूतानि जायंते ॥ अन्ने

नजातानिजीवंति। अन्नंप्रयंत्यभिसंविशंतीति। तद्विज्ञाय। पुन
रेववरुणंपितरमुपससार। अधीहिभगवोब्रह्मेति। तं होवाच॥
तपसाब्रह्मविजिज्ञासस्व। तपोब्रह्मेति। सतपोतप्यत। सतपस्त
प्त्वा। २। प्राणोब्रह्मेतिव्यजानात्। प्राणाध्येवखल्विमानिभूता
निजायंते प्राणेनजातानिजीवंति। प्राणंप्रयंत्यभिसंविशंतीति।
तद्विज्ञाय पुनरेववरुणंपितरमुपससार अधीहिभगवोब्रह्मे
ति। तं होवाच। तपसाब्रह्मविजिज्ञासस्व। तपोब्रह्मेति स
तपोतप्यत सतपस्तप्त्वा ३। मनोब्रह्मेतिव्यजानात्। मन
सोह्येवखल्विमानिभूतानिजायंते। मनसाजातानिजीवंति॥
मनःप्रयंत्यभिसंविशंतीति तद्विज्ञाय। पुनरेववरुणंपितर
मुपससार। अधीहिभगवोब्रह्मेति। तं होवाच तपसाब्रह्म
विजिज्ञासस्व तपोब्रह्मेति सतपोतप्यत सतपस्तप्त्वा। ४॥

विज्ञानं ब्रह्मेति व्यजानात्॥ विज्ञानाद्ध्येव खल्विमानि भूता
नि जायंते॥ विज्ञानेन जातानि जीवंति॥ विज्ञानं प्रयंत्यभिसंवि
शंतीति॥ तद्विज्ञाय॥ पुनरेव वरुणं पितरमुपससार॥ अधीहि
भगवो ब्रह्मेति॥ तं होवाच॥ तपसा ब्रह्म विजिज्ञासस्व॥ त
पो ब्रह्मेति॥ स तपोऽतप्यत॥ स तपस्तप्त्वा॥ ५॥ आनंदो ब्रह्मे
ति व्यजानात्॥ आनंदाद्ध्येव खल्विमानि भूतानि जायंते॥ आ
नंदेन जातानि जीवंति॥ आनंदं प्रयंत्यभिसंविशंतीति॥ सै
षा भार्गवी वारुणी विद्या॥ परमे व्योमन् प्रतिष्ठिता॥ य एवं वे
द प्रतितिष्ठति॥ अन्नवानन्नादो भवति॥ महान् भवति॥ प्रज
या पशुभिर्ब्रह्मवर्चसेन॥ महान् कीर्त्या॥ ६॥ अन्नं न निंद्या
त्॥ तद्व्रतं॥ प्राणो वा अन्नं॥ शरीरमन्नादं॥ प्राणे शरीरं प्र
तिष्ठितं॥ तदेतदन्नमन्ने प्रतिष्ठितं॥ स य एतदन्नमन्ने प्रति
शरीरे प्राणः प्रतिष्ठितः॥

तिष्ठितं वेद प्रतितिष्ठति॥ अन्नवानन्नादो भवति॥ महान्भ
वति प्रजया पशुभिर्ब्रह्मवर्चसेन॥ महान्कीर्त्या॥ ७॥ अन्नं न
परिचक्षीत॥ तद्व्रतं॥ आपो वा अन्नं॥ ज्योतिरन्नादं॥ अप्सु
ज्योतिः प्रतिष्ठितं॥ ज्योतिष्यापः प्रतिष्ठिताः॥ तदेतदन्नम
न्ने प्रतिष्ठितं॥ स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति॥
अन्नवानन्नादो भवति॥ महान्भवति॥ प्रजया पशुभिर्ब्रह्म
वर्चसेन॥ महान्कीर्त्या॥ ८॥ अन्नं बहु कुर्वीत॥ तद्व्रतं॥ पृथि
वी वा अन्नं॥ आकाशोन्नादः॥ पृथिव्यामाकाशः प्रतिष्ठितः॥
आकाशे पृथिवी प्रतिष्ठिता॥ तदेतदन्नमन्ने प्रतिष्ठितं॥ स
य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति॥
अन्नवानन्नादो भवति॥ महान्भवति॥ प्रजया पशुभिर्ब्रह्मवर्च॥ से
सेन॥ महान्कीर्त्या॥ ९॥ २॥ न कंचन वसतौ प्रत्याचक्षीत॥ त

३९

॥२०॥

दृतं॥ तस्मा द्यया कया च विधया बह्वन्नं प्राप्नुयात्॥ अराध्य
स्मा अन्नमित्याचक्षते॥ एतद्वै मुखतोन्नं राद्धं॥ मुखतोस्मा अ
न्नं राध्यते॥ एतद्वै मध्यतोन्नं राद्धं॥ मध्यतोस्मा अन्नं
राध्यते॥ एतद्वा अन्ततोन्नं राद्धं॥ अन्ततोस्मा अन्नं राध्यते॥
य एवं वेद॥ क्षेम इति वाचि॥ योगक्षेम इति प्राणापानयोः॥
कर्मेति हस्तयोः॥ गतिरिति पादयोः॥ विमुक्तिरिति पा
यौ॥ इति मानुषीः समाज्ञाः॥ अथ दैवीः॥ तृप्तिरिति ॥२०॥
वृष्टौ॥ बलमिति विद्युति॥ यश इति पशुषु॥ ज्योतिरि
ति नक्षत्रेषु॥ प्रजातिरमृतमानंद इत्युपस्थे॥ सर्वमि
त्याकाशे॥ तत्प्रतिष्ठेत्युपासीत॥ प्रतिष्ठावान् भवति॥ तन्म
ह इत्युपासीत॥ महान् भवति॥ तन्मन इत्युपासीत॥ मानवा

न् भवति॥ तन्नम इत्युपासीत॥ नम्यंतेस्मै कामाः॥ तद् ब्रह्मेत्युपा
सीत॥ ब्रह्मवान् भवति॥ तद् ब्रह्मणः परिमर इत्युपासीत॥ पर्येणं
म्रियंते द्विषंतः सपत्नाः॥ परि येऽप्रिया भ्रातृव्याः॥ स यश्चायं पुरु
षे॥ यश्चासावादित्ये॥ स एकः॥ स य एवंवित्॥ अस्माल्लोकात्प्रेत्य॥
एतमन्नमयमात्मानमुपसंक्रम्य॥ एतं प्राणमयमात्मानमुपसं
क्रम्य॥ एतं मनोमयमात्मानमुपसंक्रम्य॥ एतं विज्ञानमयमा
त्मानमुपसंक्रम्य॥ एतमानंदमयमात्मानमुपसंक्रम्य॥ इमाल्लो
कान्कामान्नि कामरूप्यनुसंचरन्॥ एतत्साम गायन्नास्ते॥ हा३
वु हा३ वु हा३ वु॥ अहमन्नमहमन्नमहमन्नं॥ अहमन्नादो३ऽह
मन्नादो३ऽहमन्नादः॥ अहं३ श्लोककृदहं३ श्लोककृदहं३
श्लोककृत्॥ अहमस्मि प्रथमजा ऋता३स्य॥ पूर्वं देवेभ्यो

पूर्वं देवेभ्यो अमृतस्य ना ३ भाइ॥ यो मा ददाति स इदेव मा ३ वा॥ अहमन्नमन्नमदन्तमाद्मि॥ अहं विश्वं भुवनमभ्यभवां ३॥ सुवर्न ज्योतीः॥ य एवं वेद॥ इत्युपनिषत्॥ ७॥ सह नाववतु॥ सह नौ भुनक्तु॥ सह वीर्यं करवावहै॥ तेजस्विनावधीतमस्तु मा विद्विषावहै॥ ॐ शान्तिः शान्तिः शान्तिः॥ ७॥ हरिः ॐ॥ अम्भस्य पारे भुवनस्य मध्ये नाकस्य पृष्ठे महतो महीयान्॥ शुक्रेण ज्योतींषि समनुप्रविष्टः प्रजापतिश्चरति गर्भे अन्तः॥ यस्मिन्निदं सं च वि चैति सर्वं यस्मिन्देवा अधि विश्वे निषेदुः॥ तदेव भूतं तदु भव्यमा इदं तदक्षरे परमे व्योमन्॥ येनावृतं खं च दिवं महीं च येनादित्यस्तपति तेजसा भ्राजसा च॥ यमन्तः समुद्रे कवयो वयन्ति यदक्षरे परमे प्रजाः॥ यतः प्रसूता जगतः प्रसूती

२१

तो येन जीवान्व्यचसर्ज भूम्यां ॥ यदोषधीभिः पुरुषान्पशूꣳश्च

विवेश भूतानि चराचराणि ॥ अतः परं नान्यदणीयसꣳ हि प

रात्परं यन्महतो महान्तं ॥ यदेकमव्यक्तमनंतरूपं विश्वं पुराणं त

मसः परस्तात् ॥ १ ॥ तदेवर्तं तदु सत्यमाहुस्तदेव ब्रह्म परमं कवी

नां ॥ इष्टापूर्तं बहुधा जातं जायमानं ॥ विश्वं बिभर्ति भुवनस्य ना

भिः ॥ तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चंद्रमाः ॥ तदेव शुक्रममृतं

तद्ब्रह्म तदापः स प्रजापतिः ॥ सर्वे निमेषा जज्ञिरे विद्युतः पुरुषा

दधि ॥ कला मुहूर्ताः काष्ठाश्चाहोरात्राश्च सर्वशः ॥ अर्धमासा मा

सा ऋतवः संवत्सरश्च कल्पंतां ॥ स आपः प्रदुघे उभे इमे अं

तरिक्षमथो सुवः ॥ नैनमूर्ध्वं न तिर्यंचं न मध्ये परिजग्रभत् ॥ न त

स्येशे कश्चन तस्य नाम महद्यशः ॥ २ ॥ न संदृशे तिष्ठति रूपमस्य

न चक्षुषा पश्यति कश्चनैनं ॥ हृदा मनीषा मनसाभिक्लृप्तो य

य नं विदुर मृतास्ते भवंति॥ अद्भ्यः संभूतो हिरण्यगर्भ इत्यष्टौ॥
एष हि देवः प्रदिशोनु सर्वाः पूर्वो हि जातः स उ गर्भे अंतः॥ स
विजायमानः स जनिष्यमाणः प्रत्यङ्मुखास्तिष्ठति विश्वतोमु
खः॥ विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतः हस्त उ
स्पात्॥ सं बाहुभ्यां नमति सं पतत्रैर्द्यावापृथिवी जनयं देव एकः॥
वेनस्तत्पश्यन्विश्वा भुवनानि विद्वान् यत्र विश्वं भवत्येकनीडं॥
यस्मिन्निदं संच विचैति सर्वं स ओतः प्रोतश्च विभुः प्रजासु॥ प्र
तद्वोचे अमृतं नु विद्वान् गंधर्वो नाम निहितं गुहासु॥ त्रीणि
पदा निहिता गुहासु यस्तद्वेद सवितुः पिता सत्॥ स नो बंधु
र्जनिता स विधाता धामानि वेद भुवनानि विश्वा॥ यत्र देवा अमृत
मानशानास्तृतीये धामान्यभ्यैरयंत॥ परि द्यावापृथिवी यंति स
द्यः परि लोकान्परि दिशः परि स्वः॥ ऋतस्य तंतुं विततं विच

निवे॥ २१॥ १२॥

यतदपश्यत्तदभवत्प्रजासु ॥ परीत्य लोकान्परीत्य भूता
नि परीत्य सर्वाः प्रदिशो दिशश्च ॥ प्रजापतिः प्रथमजा ऋ
तस्यात्मनात्मानमभिसंबभूव ॥ सदसस्पतिमद्भुतं प्रियमि
न्द्रस्य काम्यं ॥ सनिं मेधामयासिषं ॥ उद्दीप्यस्व जातवेदो पघ्नं
निर्ऋतिं मम ॥ ४ ॥ पशूंश्च मह्यमावह जीवनं च दिशो दिश ॥ मा
नो हिंसीज्जातवेदो गामश्वं पुरुषं जगत् ॥ अबिभ्रदग्न आग
हि श्रिया मा परिपातय ॥ पुरुषस्य विद्म सहस्राक्षस्य महादेवस्य
धीमहि ॥ तन्नो रुद्रः प्रचोदयात् ॥ तत्पुरुषाय विद्महे महादेवाय
धीमहि ॥ तन्नो रुद्रः प्रचोदयात् ॥ तत्पुरुषाय विद्महे वक्रतुंडाय
धीमहि ॥ तन्नो दंतिः प्रचोदयात् ॥ तत्पुरुषाय विद्महे वक्रतुंडाय
धीमहि ॥ तन्नो नंदिः प्रचोदयात् ॥ तत्पुरुषाय विद्महे महासेनाय

धीमहि तन्नो षण्मुखः प्रचोदयात् ॥ तत्पुरुषाय विद्महे सुवर्णप

क्षाय धीमहि तन्नो गरुडः प्रचोदयात् ॥ वेदात्मनाय विद्महे हिरण्यग

र्भाय धीमहि तन्नो ब्रह्म प्रचोदयात् ॥ नारायणाय विद्महे वासुदे

वाय धीमहि तन्नो विष्णुः प्रचोदयात् ॥ वज्रनखाय विद्महे तीक्ष्ण

दंष्ट्राय धीमहि ॥ तन्नो नारसिंहः प्रचोदयात् ॥ भास्कराय विद्

महे महद्द्युतिकराय धीमहि ॥ तन्नो आदित्यः प्रचोदयात् ॥ वैश्वा

॥९३॥ नराय विद्महे लालीलाय धीमहि ॥ तन्नो अग्निः प्रचोदयात् ॥ ॥९३॥

कात्यायनाय विद्महे कन्यकुमारि धीमहि ॥ तन्नो दुर्गिः प्रचोद

यात् ॥ सहस्रपरमा देवी शतमूला शताङ्कुरा ॥ सर्वं हरतु मे पापं

दूर्वा दुःस्वप्ननाशनी ॥ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषः

परि ॥ एवा नो दूर्वे प्रतनु सहस्रेण शतेन च ॥ या शतेन प्रतनोषि

सहस्रेण धिरोहसि ॥ तस्यास्ते देवीष्टके विधेम हविषा वयं ॥ अश्व
क्रांते रथक्रांते विष्णुक्रांते वसुंधरा ॥ शिरसा धारयिष्यामि रक्ष
मां पदे पदे ॥ भूमि धेनुर्धरणी लोकधारिणी ॥ उद्धृतासि वराहेण
कृष्णेन शतबाहुना ॥ मृत्तिके हन मे हन मे पापं यन्मया दुष्कृतं कृतं ॥
मृत्तिके ब्रह्मदत्तासि काश्यपेनाभिमंत्रिता ॥ मृत्तिके देहि मे पुष्टिं
त्वयि सर्वं प्रतिष्ठितं ॥८॥ मृत्तिके प्रतिष्ठिते सर्वं तन्मे निर्णुद मृत्तिके ॥
तया हतेन पापेन गच्छामि परमां गतिं ॥ यत इन्द्र भयामहे ततो नः अ
भयं कृधि मघवंछग्धि तव तन्न ऊतये विद्विषो विमृधो जहि ॥
स्वस्तिदा विशस्पतिर्वृत्रहा विमृधो वशी ॥ वृषेंद्रः पुर एतु नः स्वस्ति
दा अभयंकरः ॥ स्वस्ति न इंद्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववे
दाः ॥ स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥

आपांतमन्युस्तृपलप्रभर्मा धुनिः शिमीवाञ्छरुमाँ २ ऋजीषी ॥
सोमो विश्वान्यतसा वनानि नार्वागिंद्रं प्रतिमानानि देभुः ९ अल
जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः ॥ स बुध्निया
उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः ॥ स्योना पृथिवी
भवानृक्षरा निवेशनी ॥ यच्छा नः शर्म सप्रथाः ॥ गंधद्वारां दुराधर्षां
२४ नित्यपुष्टां करीषिणीं ॥ ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियं ॥ २४
श्रीर्मे भजतु ॥ अलक्ष्मीर्मे नश्यतु ॥ विष्णुमुखा वै देवाश्छंदोभिरिमां
लोकाननपजय्यमभ्यजयन् ॥ महाँ इंद्रो वज्रबाहुः षोडशी शर्म यं
च्छतु १० स्वस्ति नो मघवा करोतु हंतु पाप्मानं योस्मान्द्वेष्टि ॥ सोमा
नं स्वरणं कृणुहि ब्रह्मणस्पते कक्षीवंतं य औशिजं ॥ शरीरं य
ज्ञशमलं कुसीदं तस्मिन्सीदतु योस्मान्द्वेष्टि ॥ चरणं पवित्रं वित

48

तं पुराणं येन पूतस्तरति दुष्कृतानि ॥ तेन पवित्रेण शुद्धेन पूताः
अति पाप्मानमरातिं तरेम ॥ सजोषा इन्द्र सगणो मरुद्भिः सोमं पिब
वृत्रहं शूर विद्वान् ॥ जहि शत्रूंरप मृधो नुदस्वाथाभयं कृणुहि
विश्वतो नः ॥ सुमित्रा न आप ओषधयः सन्तु दुर्मित्रास्तस्मै सन्तु
योऽस्मान्द्वेष्टि यं च वयं द्विष्मः ॥ आपो हि ष्ठा मयोभुवस्ता न ऊर्जे
दधातन ॥ महे रणाय चक्षसे ॥ यो वः शिवतमो रसस्तस्य भाजयतेह नः ॥ उशतीरिव मातरः ॥ तस्मा अरंगमाम वो यस्य क्षयाय
जिन्वथ ॥ आपो जनयथा च नः ॥ हिरण्यशृङ्गं वरुणं प्रपद्ये
तीर्थं मे देहि याचितः ॥ यन्मया भुक्तमसाधूनां पापेभ्यश्च प्रतिग्रहः ॥ यन्मे मनसा वाचा कर्मणा वा दुष्कृतं कृतं ॥ तन्न इन्द्रो वरुणो बृहस्पतिः ॥ सविता च पुनन्तु पुनः पुनः ॥ नमोऽग्नये प्सुमते नमः

मइंद्राय नमो वरुणाय नमो वारुण्यै नमोभ्यः ॥१२॥ यदपांक्रू
र यदमेध्यं यदशांतं तदपगच्छतात् ॥ अत्याशनादतीपा
नाद्यच्च उग्रात्प्रतिग्रहात् ॥ तन्नो वरुणो राजा पाणिना ह्यवम
र्शतु ॥ सोहमपापो विरजो निर्मुक्तो मुक्तकिल्बिषः ॥ नाकस्य पृ
ष्ठमारुह्य गच्छेद्ब्रह्मसलोकतां ॥ यश्चाप्सु वरुणः स पुनात्वघ
मर्षणः ॥ इमं मे गंगे यमुने सरस्वति शुतुद्रि स्तोमं सचता प
२५ रुष्णिया ॥ असिक्न्या मरुद्वृधे वितस्तयार्जीकीये शृणुह्या २५
सुषोमया ॥ ऋतं च सत्यं चाभीद्धात्तपसोध्यजायत ॥ ततो रा
त्र्यजायत ततः समुद्रो अर्णवः ॥१३॥ समुद्रादर्णवादधि सं
वत्सरो अजायत ॥ अहोरात्राणि विदधद्विश्वस्य मिषतो व
शी ॥ सूर्याचंद्रमसौ धाता यथापूर्वमकल्पयत ॥ दिवं च पृथि

यो द्यांतरिक्षमथो सुवः॥ यस्य पृथिव्याꣳ रजस्च मांतरिक्षे वि
रोदसी। इमाꣳ स्तदापो वरुणः पुनात्वघमर्षणाः। एष भू
तस्य मध्ये भुवनस्य गोप्ता एष पुण्यकृतां लोकाने ष मृत्यो
हिरण्मयो द्यावापृथिव्योर्हिरण्मयꣳ संश्रितꣳ सुवः
२४ सनः सुवः संशिशाधि॥ आर्द्रं ज्वलति ज्योतिरह
मस्मि ज्योतिर्ज्वलति ब्रह्माहमस्मि। योहमस्मि ब्रह्माहम
स्मि अहमस्मि ब्रह्माहमस्मि। अहमेवाहं मांजुहोमि स्वा
हा। अकार्यकार्यवकीर्णी स्तेनो भ्रूणहा गुरुतल्पगः वरुणो
यामघमर्षणास्तस्मात्पापात्प्रमुच्यते रजोभूमिस्त्वमाꣳ रोदय
स्वप्रवदंति धीराः। आक्रान्त्समुद्रः प्रथमे विधर्मं जनयन्प्रजा
भुवनस्य राजा। वृषापवित्रे अधिसानो अव्ये बृहत्सोमोवा

वृषे स्कपान ॥ ३ ॥ ७ ॥ पुरस्ताच्चन्द्रो गुहा स्कन्मनंच
कतुंडाय धीमहि तीक्ष्णदंष्ट्राय धीमहि पूरिप्रति
षितं दे सुपक्षितु दधात नाज्ञो प्रपयि: स्कधोराजे
कंच ॥ १ ॥ रुद्रो रुद्र खंद तिश्नुनोदि: षण्मुखाय एव चागरु
डो ब्रह्म विसुश्चनारसिं हस्तपेव च ॥ आदित्यो णिश्च
दुर्गिश्च कं मेषा द्वादशा भेसि ॥ मम वच वा स्क चेनावभा
वे कात्यायनाय ज्ञातवहस स्कन्धाम सा मम राती यताजि
दहातिवद ॥ सनः पर्षदति दुर्गाणि विश्वा नावेव सिंधु
दुरितात्यग्निः ॥ तामग्निवर्णां तपसा ज्वलंतीं वैरोचनीं
कर्मफलेषु जुष्टां दुर्गां देवी ॥ शरणमहं प्रपद्ये स्तत्तर

२६

52

सिंतरसेनमः॥ अग्नेत्वंपारयानव्यो॥ अस्मान् स्वस्तिभिरति
दुर्गाणिविश्वा॥ पूश्चपृथ्वीबहुलानउर्वीभवातोकायतनया
यशंयोः॥ विश्वानिनोदुर्गहाजातवेदः सिंधून्ननावादुरितातिं
पर्षि॥ अग्ने अत्रिवन्मनसागृणानोस्माकंबोध्यविताततूनां॥ पृत नो
नाजितं॥ सहमानमुग्रमग्निं हुवेमपरमात्सधस्थात्॥ सनः प
र्षदतिदुर्गाणिविश्वाक्षामद्देवो अतिदुरितात्यग्निः॥ प्रत्नोषि
कमीड्यो अध्वरेषुसनाच्चहोतानव्यश्चसत्सि॥ स्वांचाग्नेतनुवं
पिप्रयस्वास्मभ्यंचसौभगमायजस्व॥ गोभिर्जुष्टमयुजोनिषिक्तंत
वेंद्रविष्णोरनुसंचरेम॥ नाकस्यपृष्ठमभिसंवसानोवैष्णवींलोक
इहमादयंतां॥२॥ भूरन्नमग्नये पृथिव्यै स्वाहा॥ भुवोन्नंवायवेंत
तरिक्षायस्वाहा॥ सुवरन्नमादित्यायदिवेस्वाहा॥ भूर्भुवःस्व

रन्नं चंद्रमसे दिग्भ्यः स्वाहा नमो देवेभ्यः स्वधा पितृभ्यो भूर्भुवः स्व
वुरन्नमों ॥ ३ ॥ भूरग्नये पृथिव्ये स्वाहा भुवो वायवेंतरिक्षाय स्वाहा
स्वरादित्याय दिवे स्वाहा भूर्भुवः स्वश्चंद्रमसे दिग्भ्यः स्वाहा न
मो देवेभ्यः स्वधा पितृभ्यो भूर्भुवः स्वरग्ने ओं ॥ ४ ॥ भूरग्नये च
पृथिव्ये च महते च स्वाहा भुवो वायवे चांतरिक्षाय च महते च स्वाहा
स्वरादित्याय च दिवे च महते च स्वाहा भूर्भुवः स्वश्चंद्रम
से च नक्षत्रेभ्यश्च दिग्भ्यश्च महते च स्वाहा नमो देवेभ्यः

२४

स्वधा पितृभ्यो भूर्भुवः स्वर्महरों ॥ ५ ॥ पाहि नो अग्न एन
से स्वाहा पाहि नो विश्ववेदसे स्वाहा । यज्ञं पाहि विभावसो
स्वाहा सर्वं पाहि शतक्रतो स्वाहा । पाहि नो अग्न एकया पा
ह्युत द्वितीयया । पाह्यूर्जं तृतीयया । पाहि गीर्भिश्चतसृभि

पसोः स्वाहा ७ यश्छंद सामृषभो विश्वरूपश्छंदोभ्यश्छं
दा ऽ श्याविवेश। सवा ऽ शिक्यः पुरो वाचोपनिषदिंद्रो ज्येष्ठइं
द्रियाय ऋषिभ्यो नमो देवेभ्यः स्वधा पितृभ्यो भूर्भुवः सुवश्छं
द ओं ८ नमो ब्रह्मणे धारणं मे अस्त्वनिराकरणं धारयिता भू
यासं कर्णयोः श्रुतं माच्योढं ममामुष्य ओं ९ ऋतं तपः सत्यं त
पः श्रुतं तपः शांतं तपो दमस्तपः शमस्तपो दानं तपो यज्ञं तपो भू
र्भुवः सुवर्ब्रह्मैतदुपास्स्वैतदुपास्यैतत्तपः १० यथा वृक्षस्य
संपुष्पितस्य दूराद्गंधो वात्येवं पुण्यस्य कर्मणो दूराद्गंधो वाति
यथासिधारा कर्तेऽवहितामवक्रामे यद्युवे युवे हवा वि च पतिष्या
मि कर्तं पतिष्यामीत्येवममृतादात्मानं जुगुप्सेत ११ अणोर
णीयान्महतो महीयानात्मा गुहायां निहितास्य जंतोः तमक्र

55

नुपश्यति वीतशोको धातुः प्रसादान्महिमानमीशं सप्तप्रा
णाः प्रभवंति तस्मात्सप्तार्चिषः समिधः सप्त जिह्वाः सप्त इमे
लोका येषु चरंति प्राणा गुहाशयान्निहिताः सप्त सप्त अतः स
मुद्रा गिरयश्च सर्वेस्मात्स्यंदंते सिंधवः सर्वरूपाः अतश्च वि
श्वा ओषधयो रसाश्च येनैष भूतस्तिष्ठत्यंतरात्मा ब्रह्मादेवानां प
दवीः कवीनामृषिर्विप्राणां महिषो मृगाणां श्येनो गृध्राणां द
स्वधितिर्वनानां सोमः पवित्रमत्येति रेभन् अजामेकां लोहि
तशुक्लकृष्णां बह्वीं प्रजां जनयंतीं सरूपां अजो ह्येको जुष
माणोनुशेते जहात्येनां भुक्तभोगामजोन्यः १ हंसः शुचिष
द्वसुरंतरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् नृषद्वरसदृ
तसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् घृतं मि

मिश्ले घृतमस्य योनिर्घृते श्रितो घृतमुवस्य धाम । अनुष्वधमा
वह मादयस्व स्वाहाकृतं वृषभ वक्षि हव्यं । समुद्रादूर्मिर्मधुमाँ ॥ ८ ॥ उ
दारदुपांशुना सममृतत्वमानट् । घृतस्य नाम गुह्यं यदस्ति जिह्वा
देवानाममृतस्य नाभिः । वयं नाम प्रब्रवामा घृतेनास्मिन्यज्ञे धा
रयामा नमोभिः । उपब्रह्मा शृणवच्छस्यमानं चतुः शृंगोवमीद्गौर ए
तत् ॥ चत्वारि शृंगा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश ॥ १ ॥ त्रिधा
हितं पणिभिर्गुह्यमानं गवि देवासो घृतमन्वविंदन् । इंद्र एकं सू
र्य एकं जजान वेनादेकं स्वधया निष्टतक्षुः । यो देवानां प्रथमं पु
रस्तात् विश्वाधियो रुद्रो महर्षिः । हिरण्यगर्भं पश्यत जायमानं ।
स नो देवः शुभया स्मृत्या संयुनक्तु । यस्मात्परं नापरमस्ति किं

विद्यस्मान्नापरीयोनज्यायोस्तिकश्चित् वृक्षइवस्तब्धोदिवि
तिष्ठत्येकस्तेनेदंपूर्णंपुरुषेणसर्वं नकर्मणानप्रजयाधनेन
त्यागेनैकेअमृतत्वमानशुः परेणनाकंनिहितंगुहायांविभ्रा
जदेतद्यतयोविशंति वेदांतविज्ञानसुनिश्चितार्थाः सन्यासयो
गाद्यतयःशुद्धसत्वाः तेब्रह्मलोकेतुपरांतकालेपरामृतात्परि
मुच्यंतिसर्वे दह्रंविपापंपरमेश्मभूतंयत्पुंडरीकंपुरमध्यस
॥२०॥ ंस्थं तत्रापिदह्रंगगनंविशोकस्तस्मिन्यदंतस्तदुपासित ॥२१॥
व्यं योवेदादौस्वरःप्रोक्तोवेदांतेचप्रतिष्ठितः तस्यप्रकृति
लीनस्ययःपरःसमहेश्वरः ॥ अजोन्यआविवेशसर्ववस्त्वा
रिक्षा ॥२२॥ सहस्रशीर्षंदेवंविश्वाक्षंविश्वशंभुवं विश्वंनाराय
णंदेवमक्षरंपरमंपदं विश्वतःपरमान्नित्यंविश्वंनारायण

ऽ हरिं विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति पतिं विश्वस्या
त्मेश्वरऽ शाश्वतऽ शिवमच्युतं नारायणं महाज्ञेयं विश्वात्मानं
परायणं नारायणपरो ज्योतिरात्मा नारायणः परः नारायणप
रं ब्रह्मतत्त्वं नारायणः परः नारायणपरो ध्याता ध्यानं नारायणः
परः यच्च किंचिज्जगत्सर्वं दृश्यते श्रूयतेपि वा १ अंतर्बहिश्च
तत्सर्वं व्याप्य नारायणः स्थितः अनंतमव्ययं कविऽ समुद्रेंतं वि
श्वसंभुवं पद्मकोशप्रतीकाशऽ हृदयं चाप्यधोमुखं अधो नि
ष्ट्या वितस्त्यांते नाभ्यामुपरि तिष्ठति ज्वालमालाकुलं भाती वि
श्वस्यायतनं महत् संततऽ शिलाभिस्तु लंबत्याकोशसंनि
भं तस्यांते सुषिरऽ सूक्ष्मं तस्मिन्सर्वं प्रतिष्ठितं तस्य मध्ये म
हानग्निर्विश्वार्चिर्विश्वतोमुखः सोग्रभुग्विभजंतिष्ठन्नाहार

मजरः कविः। तिर्यगूर्ध्वमधःशायी रश्मयस्तस्य संतता। संताप
यति स्वं देहमापादतलमस्तकः। तस्य मध्ये वह्निशिखा अणी
योर्ध्वा व्यवस्थितः। नीलतोयदमध्यस्थाद्विद्युल्लेखेव भास्व
रा। नीवारशूकवत्तन्वी पीता भास्वत्यणूपमा। तस्याः शिखाया
मध्ये परमात्मा व्यवस्थितः। स ब्रह्म स शिवः स हरिः सेंद्रः सोक्ष
रः परमः स्वराट्॥२॥ अपि वा सततापकूव ॥१३॥ आदित्यो वा ३०
३० एष एतन्मंडलं तपति तत्र ता ऋचस्तदृचामंडलं स ऋचां लो
कोथ य एष एतस्मिन्मंडलेर्चिर्दीप्यते तानि सामानि स साम्नां लोको
थ य एष एतस्मिन्मंडलेर्चिषि पुरुषस्तानि यजूंषि स यजुषामं
डलं स यजुषां लोकः सैषा त्रय्येव विद्या तपति य एषोन्तरादित्ये
हिरण्मयः पुरुषः॥१४॥ आदित्यो वै तेज ओजो बलं यशश्चक्षुः

श्रोत्र मात्मामनोमन्युर्मनुर्मृत्कः सत्यो मित्रो वायुराकाशः प्रा
णो लोकपालः कः किं तत्सत्यमन्नममृतो जीवो विश्वः क
तमः स्वयंभु ब्रह्मैतदमृत एष पुरुष एष भूतानामधिपतिर्ब्र
ह्मणः सायुज्यं सलोकतामाप्नोत्येतासामेव देवतानां
सायुज्यं सार्ष्टितां समानलोकतामाप्नोति य एवं वेद इत्युप
निषत् १५ निधनपतये नमः निधनपतान्तिकाय नमः
ऊर्ध्वाय नमः ऊर्ध्वलिंगाय नमः हिरण्याय नमः हिरण्यलिं
गाय नमः सुवर्णाय नमः सुवर्णलिंगाय नमः दिव्याय नमः
दिव्यलिंगाय नमः भवाय नमः भवलिंगाय नमः शर्वाय
नमः शर्वलिंगाय नमः शिवाय नमः शिवलिंगाय

61

नमः ज्वलायनमः ज्वलालिंगायनमः आत्मायन
मः आत्मलिंगायनमः परमायनमः परमलिंगायन
मः एतत्सोमस्य सूर्यस्य सर्वलिंग ५ स्थापयति पाणिमंत्रं
पवित्रं १६ सद्योजातंप्रपद्यामि सद्योजाताय वै नमोनमः
भवे भवेनातिभवे भवस्वमां भवोद्भवायनमः १७ वामदेवा
यनमो ज्येष्ठायनमः श्रेष्ठायनमो रुद्रायनमः कालायनमः
कलविकरणायनमो बलविकरणायनमो बलायनमो बल
प्रमथनायनमः सर्वभूतदमनायनमो मनोन्मनायनमः ॥ ३१
१८ अघोरेभ्योथघोरेभ्यो घोरघोरतरेभ्यः सर्वेभ्यः
सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः १९ तत्पुरुषायवि
द्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात् २०

ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्म
णोधिपतिर्ब्रह्माशिवो मेऽअस्तु सदाशिवों २१ नमो हिरण्यबा
हवे हिरण्यवर्णाय हिरण्यरूपाय हिरण्यपतयेंबिकापतय उमाप
तये पशुपतये नमो नमः। २२ ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिंग
लं ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः २३ सर्वो वै रुद्रस्त
स्मै रुद्राय नमोऽअस्तु पुरुषो वै रुद्रः सन्महो नमो नमः विश्वं भूतं
भुवनं चित्रं बहुधा जातं जायमानं च यत् सर्वो ह्येष रुद्रस्तस्मै रुद्रा
य नमोऽअस्तु २४ कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे वोचे
म शंतमं हृदे सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमोऽअस्तु २५ य
स्य वैकंकत्यग्निहोत्रहवणी भवति प्रत्येवास्याहुतयस्तिष्ठंत्यथो

प्रतिष्ठित्यै २६ कृणुष्वपाजइति पंच २७ अदितिर्देवा गंध
र्वा मनुष्याः पितरोसुरास्तेषां॥ सर्वभूतानां माता मेदिनी महता म
ही सावित्री गायत्री जगत्युर्वी पृथ्वी बहुला विश्वा भूता कतमा का
यासा सत्येत्यमृतेति वसिष्ठः २८ आपो वा इदं॥ सर्वं विश्वा भूता
न्यापः प्राणा वा आपः पशव आपोन्नमापोमृतमापः सम्राडापो
विराडापः स्वराडापश्छंदां॥ स्यापो ज्योतीं॥ ष्यापो यजूं॥ ष्यापः स
त्यमापः सर्वा देवता आपो भूर्भुवः स्वराप ॐ २९ आपः पुनं
तु पृथिवीं पृथिवी पूता पुनातु मां पुनंतु ब्रह्मणस्पतिर्ब्रह्मपूता पुना
तु मां यदुच्छिष्टमभोज्यं यद्वा दुश्चरितं मम सर्वं पुनंतु मामापोस
तां च प्रतिग्रहं॥ स्वाहा ३० अग्निश्च मामन्युश्च मन्युपतयश्च म
न्युकृतेभ्यः पापेभ्यो रक्षंतां यदन्हा पापमकार्षं मनसा वा
चा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना अहस्तदवलुंपतु यत्किंचदुरि

२२

३२

रितं मयि इदमहं माममृतयोनौ सत्ये ज्योतिषि जुहोमि स्वाहा ३१

सूर्यश्च मामन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षंतां यद्रात्र्या पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना रात्रिस्तदवलुंपतु यत्किंचदुरितं मयि इदमहं माममृतयोनौ सूर्ये ज्योतिषि जुहोमि स्वाहा ओमित्येकाक्षरं ब्रह्म अग्निर्देवता ब्रह्मइत्यार्षं गायत्रं छंदसं परमात्मं सरूपं सायुज्यं विनियोगं आयातु वरदा देवी अक्षरं ब्रह्मसंमितं गायत्री छंदसां मातेदं ब्रह्म जुषस्व मे यदन्हात्कुरुते पापं तदन्हात्प्रतिमुच्यते यद्रात्रियात्कुरुते पापं तद्रात्रियात्प्रतिमुच्यते सर्ववर्णे महादेवी संध्या विद्ये सरस्वती ३४ ओजोसि सहोसि बलमसि भ्राजो

65

२२

सि देवानां धाम नामासि विश्वमसि विश्वायुः सर्वमसि सर्वा
युरभिभूरों गायत्रीमावाहयामि सावित्रीमावाहयामि सर
स्वतीमावाहयामि छंदर्षीनावाहयामि श्रियमावाहयामि गा
यत्रिया गायत्रीछंदो विश्वामित्रऋषिः सविता देवताग्निर्मुखं ब्रह्मा
शिरो विष्णुर्हृदयं रुद्रः शिखा पृथिवीयोनिः प्राणापानव्या
नोदानसमाना सप्राणा श्वेतवर्णा सांख्यायनसगोत्रा गाय
त्री चतुर्विंशत्यक्षरा त्रिपदा षट्कुक्षिः पंचशीर्षोपनयने
विनियोगः ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ
तपः ॐ सत्यं ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि
धियो यो नः प्रचोदयात् ओमापो ज्योती रसोऽमृतं ब्रह्म भूर्भु
वः स्वरों ॥ उत्तमे शिखरे जाते भूम्यां पर्वतमूर्धनि ब्रा

ह्मणेभ्यो भ्यनुज्ञाता गच्छ देवि यथासुखं ॥ स्तुतो मया वरदा वेदमा
ता प्रचोदयंती पवने द्विजाता ॥ आयुः पृथिव्यां द्रविणं ब्रह्मवर्चसं
मह्यं दत्वा प्रजातुं ब्रह्मलोकं ॥ २६ घृणिः सूर्य आदित्यो न प्रभा
त्यक्षरं मधु क्षरंति तद्रसं सत्यं वै तद्रसमापो ज्योती रसोऽमृतं
ब्रह्म भूर्भुवः स्वरों ॥ ब्रह्म मे तु मां ॥ मधु मे तु मां ॥ ब्रह्ममेव
मधु मे तु मां ॥ यास्ते सोम प्रजा वत्सोऽभि सो अहं ॥ दुःष्वप्न्यहं दुरुष्वह ॥
यास्ते सोम प्राणाः स्तां जुहोमि ॥ त्रिसुपर्णमयाचितं ब्राह्मणाय
दद्यात् ब्रह्महत्यां वा एते घ्नंति ये ब्राह्मणास्त्रिसुपर्णं पठंति ॥
ते सोमं प्राप्नुवंति ॥ आसहस्रात्पंक्तिं पुनंति ॥ ओं ॥ २९ ॥ ब्रह्ममेध
या ॥ मधु मेधया ॥ ब्रह्ममेव मधु मेधया ॥ अद्यानो देव सवितः
प्रजावत्सावीः सौभगं ॥ परा दुःष्वप्न्यं सुव ॥ विश्वानि देव

67

सवितर्दुरितानि परासुव॥ यद्भद्रंतन्नआसुव मधुवाताऽ॥
ऋतायते मधु क्षरंति सिंधवः माध्वीर्नः संत्वोषधीः मधुन
क्तमुतोषसो मधुमत्पार्थिवꣳ रजः मधुद्यौरस्तु नः पिता॥ मधु
मान्नोवनस्पतिर्मधुमाꣳ अस्तु सूर्यः॥ माध्वीर्गावो भवंतु नः॥
यइमं त्रिसुपर्णमयाचितं ब्राह्मणायदद्यात् भ्रूणहत्यांवा
एते घ्नंति॥ ये ब्राह्मणास्त्रिसुपर्णं पठंति ते सोमं प्राप्नुवंति॥ आ
सहस्रात्पङ्क्तिं पुनंति॥ ओम्॥ ३॥ ब्रह्ममेधवा॥ मधुमेधवा॥
ब्रह्ममेवमधुमेधवा॥ ब्रह्मादेवानांपदवीः कवीनामृषिर्विप्रा
णांमहिषो मृगाणां॥ श्येनोगृध्राणाꣳ स्वधितिर्वनानाꣳ सो
मः पवित्रमत्येतिरेभन्॥ हꣳसः शुचिषद्वसुरंतरिक्षसद्धोता
वेदिषदतिथिर्दुरोणसत्॥ नृषद्वरसदृतसद्व्योमसदब्जागोजाऽ

ऋतजाः अद्रिजाः ऋतंबृहत ॥ ऋचेत्वा रुचेत्वा ॥ समित्स्रवंति
सरितो न धेनाः ॥ अंतर्हृदा मनसा पूयमानाः ॥ घृतस्य धारा अ
भिचाकशीमि ॥ हिरण्ययो वेतसो मध्ये आसां ॥ तस्मिन्सुपर्णो म
धुकृत्कुलायी भजन्नास्ते मधु देवताभ्यः ॥ तस्यासते हरयः सप्त
तीरे स्वधां दुहाना अमृतस्य धाराः ॥ यइदं त्रिसुपर्णमयाचितं
ब्राह्मणाय दद्यात् ॥ वीरहत्यां वा एते घ्नंति ये ब्राह्मणास्त्रिसु
पर्णं पठंति ॥ ते सोमं प्राप्नुवंति ॥ आसहस्रात्पंक्तिं पुनंति ॥ ओम् ॥
॥४० मेधा देवी जुषमाणा न आगाद्विश्वाची भद्रा सुमनस्यमाना ॥
त्वया जुष्टा नुदमाना दुरुक्तान्बृहद्वदेम विदथे सुवीराः ॥ त्वया
जुष्ट ऋषिर्भवति देवि त्वया ब्रह्मागतश्रीरुत त्वया ॥ त्वया

ज्यहश्विन्नं विंदते वसू सा नो जुषस्व द्रविणो न मेधे ॥४१॥ मेधां
म इंद्रो ददातु मेधां देवी सरस्वती ॥ मेधां मे ऽअश्विनावु भा
वाधत्तां पुष्करः स्रजा ॥ अप्सरासु च या मेधा गंधर्वेषु च य
न्मनः दैवी मेधा सरस्वती सा मां मेधा सुरभिर्जुषतां स्वाहा ॥
आ मां मेधा सुरभि विश्वरूपा हिरण्यवर्णा जगती जगम्या ॥
ऊर्जस्वती पयसा पिन्वमाना सा मां मेधा सुप्रतीका जुषंतां ॥४३॥

२५ मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु ॥ मयि मेधां मयि प्र २५
जां मयींद्र इंद्रियं दधातु ॥ मयि मेधां मयि प्रजां मयि सूर्यो भ्रा
जो दधातु ॥४४॥ अपैतु मृत्युरमृतं न आगन् वैवस्वतो नो
अभयं कृणोतु पर्णं वनस्पतेरिवाभि नः शीयतां रयिः सचतां
नः शचीपतिः ॥४५॥ परं मृत्यो अनु परेहि पंथां यस्ते स्व इतरो

दै

देवयानात् । चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजां रीरिषो मो
त वीरान् ४६ वातं प्राणं मनसान्वारभामहे प्रजापतिं यो भुव
नस्य गोपाः । स नो मृत्योस्त्रायतां पात्वंहसः ज्योग्जीवा अज
रामशीमहि ४७ अमुत्रभूयादध यद्यमस्य बृहस्पतेः
अभिशस्तेरमुंचः । प्रत्यौहतामश्विना मृत्युमस्माद्देवानां
मग्ने भिषजा शचीभिः ४८ हरिं हरन्तमनुयन्ति देवा वि
श्वस्येशानं वृषभं मतीनां । ब्रह्मसरूपमनु मेदमागादय
नं मा विवधीर्विक्रमस्व ४९ शल्कैरग्निमिंधान उभौ लो
कौ सनेमहं । उभयोर्लोकयोरृध्वाति मृत्युं तराम्यहं ५०
मा छिदो मृत्यो मा वधीर्मा मे बलं विवृहो मा प्रमोषीः । प्र

ज्यां मा मे रीरिष आयुरग्ने नृचक्षसं त्वा हविषा विधेम॥

॥५१॥ मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितं। मा नो वधीः पितरं मोत मातरं प्रिया मा नस्तनुवो रुद्र रीरिषः॥५२॥ मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः॥ वीरान्मा नो रुद्र भामितो वधीर्हविष्मंतो नमसा विधेम ते॥५३॥ प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव॥ यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणां॥५४॥ स्वस्तिदा विशस्पतिर्वृत्रहा विमृधो वशी॥ वृषेंद्रः पुर एतु नः स्व

स्तिदा अभयंकरः ॥५५॥ त्र्यंबकं यजामहे सुगंधिं पु
ष्टिवर्द्धनं। उर्वारुकमिव बंधनान्मृत्योर्मुक्षीयमामृतात्॥
॥५६॥ येते सहस्रमयुतं पाशामृत्योमर्त्यायहंतवे॥ तान्य
ज्ञस्यमायया सर्वानिवयजामहे॥ ५७॥ मृत्यवेस्वाहा मृत्य
वेस्वाहा॥ ५८॥ देवकृतस्यैनसोवयजनमसि स्वाहा॥ मनु
ष्यकृतस्यैनसोवयजनमसि स्वाहा॥ पितृकृतस्यैनसोव
यजनमसिस्वाहा॥ आत्मकृतस्यैनसोवयजनमसिस्वाहा॥
अन्यकृतस्यैनसोवयजनमसिस्वाहा॥ अस्मत्कृतस्यैनसो
वयजनमसिस्वाहा॥ यद्दिवाचनक्तंचैनश्चकृमतस्यावय

जनमसि स्वाहा ॥ यस्स्वपंतश्च जाग्रतश्चैनश्चकृम तस्या

व यजनमसि स्वाहा ॥ यत्सुषुप्तश्च जाग्रतश्चैनश्चकृम तस्या

व यजनमसि स्वाहा ॥ यद्विद्वांꣳसश्चाविद्वाꣳसश्चैनश्चकृम

तस्यावयजनमसि स्वाहा ॥ एनस एनसोवयजनमसि स्वाहा ॥

५९ यद्वो देवाश्चकृम जिह्वया गुरु मनसो वा प्रयुती देवहेडनं

अरावा यो नो अभि दुच्छुनायते तस्मिन्तदेनो वसवो निधेत

न स्वाहा ६० कामोकार्षीन्नमो नमः ॥ कामोकार्षीत्कामः

करोति नाहं करोमि कामः कर्त्ता नाहं कर्त्ता कामः कारयिता

नाहं कारयिता एष ते काम कामाय स्वाहा ६१ मन्युरकार्षी

न्नमो नमः मन्युरकार्षीन्मन्युः करोति नाहं करोमि मन्युः क

२८

२८

74.

त्तानाहं कर्त्ता मन्युः कारयिता नाहं कारयिता रक्षते मन्यो मन्य
वे स्वाहा ॥ ६२ ॥ तिलांजुहोमि सरसां सपिष्टान् गांधार ममचित्ते
रमंतु स्वाहा ॥ गावो हिरण्यं धनमन्न पानं सर्वेषां श्रियै स्वा
हा ॥ श्रियं च लक्ष्मीं च पुष्टिं च कीर्त्तिं चानृण्यतां ॥ ब्रह्मण्यं बहुपुत्र
तां ॥ श्रद्धा मेधे प्रजाः संददातु स्वाहा ॥ ६३ ॥ तिलाः कृष्णास्तिलाः
श्वेता तिलाः सौम्या वशानुगाः ॥ तिलाः पुनंतु मे पापं यत्किंचिद्दु
रितं मयि स्वाहा ॥ चोरस्यान्नं नवश्राद्धं ब्रह्महा गुरुतल्पगः ॥ गो
स्तेयं सुरापानं भ्रूणहत्या तिला शांतिं शमयंतु स्वाहा ॥ श्री
श्च लक्ष्मीश्च पुष्टीश्च कीर्त्तिश्चानृण्यतां ॥ ब्रह्मण्यं बहुपुत्रतां ॥ श्र
द्धा मेधे प्रज्ञा तु जातवेदः संददातु स्वाहा ॥ ६४ ॥ प्राणापान व्यानो

दानसमानामेशुध्यंतांज्योतिरहं विरजाविपाप्माभूयासं स्वाहा ॥
वाङ्मनश्चक्षुः श्रोत्रजिह्वाघ्राणरेतोबुध्याकूतिः संकल्पामेशु
ध्यंतांज्योतिरहं विरजाविपाप्माभूयासं स्वाहा ॥ त्वक्चर्ममा
ंसरुधिरमेदोमज्जास्नायवोस्थीनिमेशुध्यंतांज्योतिरहं विर
जोविपाप्माभूयासं स्वाहा ॥ शिरः पाणिपादपार्श्वपृष्ठोरु
दरजंघशिश्नोपस्थपायवोमे० स्वाहा ॥ उत्तिष्ठ पुरुष हरितपि
ंगललोहिताक्षिदेहिदेहिजदापयितामे० स्वाहा ॥ ६५ पृथिव्या
पस्तेजोवायुराकाशमे० स्वाहा ॥ शब्दस्पर्शरूपरसगंधामे०
स्वाहा ॥ मनोवाक्कायकर्माणिमे० ॥ अव्यक्तभावैरहंकारै० ॥ आ
त्मामे० ॥ अंतरात्मामे० ॥ परमात्मामे० ॥ क्षुधे स्वाहा ॥ क्षुत्पिपासा
यस्वाहा ॥ विविट्यै स्वाहा ॥ ऋग्विधानाय स्वाहा ॥ कषोत्काय

स्वाहा ॥ क्षुत्पिपासामलं ज्येष्ठामलक्ष्मीर्नाशयाम्यहं ॥ अभू
तिमसमृद्धिं च सर्वान्निर्णुद मे पाप्मानँ स्वाहा ॥ अन्नमयप्राण
मय मनोमय विज्ञानमयमानंदमयमात्मा मे शुध्यंतां ज्योतिर
हं विरजा विपाप्मा भूयासँ स्वाहा ॥ ६६ ॥ अग्नये स्वाहा ॥ वि
श्वेभ्यो देवेभ्यः स्वाहा ॥ ध्रुवाय भूमाय स्वाहा ॥ ध्रुवक्षितये स्वा॰
अच्युतक्षितये स्वाहा ॥ अग्नये स्विष्टकृते स्वाहा ॥ धर्माय स्वा
हा ॥ अधर्माय स्वाहा ॥ अद्भ्यः स्वाहा ॥ ओषधिवनस्पतिभ्यः
स्वाहा ॥ रक्षोदेवजनेभ्यः स्वाहा ॥ गृह्याभ्यः स्वाहा ॥ अवसाने
भ्यः स्वाहा ॥ अवसानपतिभ्यः स्वाहा ॥ कामाय स्वाहा ॥ अंतरिक्षा
य स्वाहा ॥ यदेजति जगति यच्च चेष्टति नाम्नो भागो यं नाम्ने

३९

स्वाहा। पृथिव्यै स्वाहा। अंतरिक्षायस्वाहा। दिवेस्वाहा। सू
र्यायस्वाहा। चंद्रमसे स्वाहा। नक्षत्रेभ्यः स्वाहा। बृहस्पतये
स्वाहा। प्रजापतयेस्वाहा। अग्नयेस्वाहा। स्वधापितृभ्यः स्वा
हा। नमो रुद्रायपशुपतयेस्वाहा। देवेभ्यः स्वाहा। पितृभ्य
स्वधास्तु। भूतेभ्योनमः। मनुष्येभ्योहंता। प्रजापतयेस्वाहा।
परमेष्ठिने स्वाहा। यथाकूपः शतधारः सहस्रधारोऽक्षितः।
एवामेऽस्तुधान्यं ॰ सहस्रधारमक्षितं। धनधान्यैस्वाहा।
येभूताः प्रचरंति दिवानक्तं बलिमिच्छंतोवितुदस्यप्रेष्याः ते
भ्यो बलिं पुष्टिकामोहरामि मयिपुष्टिं पुष्टिपतिर्दधातुस्वाहा।
दि॰ ॐ वधिवनस्पतिभ्यः स्वाहांतरिक्षायस्वाहा नमोरुद्रा
यपशुपतयेस्वाहा वितुदस्यप्रेष्याएकंच ओंनक्ष्ले ओंत

३९

78

द्वायुः ॐ तदात्मा ओं तत्सत्यं ओं तत्सर्वं ॐ तत्पुरोर्न्नमः
अंतश्चरति भूतेषु गुहायां विश्वमूर्त्तिषु त्वं यज्ञस्त्वं वषट्का
रस्त्वमिंद्रस्त्वꣳ रुद्रस्त्वं विष्णुस्त्वं ब्रह्मा त्वं प्रजापतिः त्वं तदाप
आपोज्योती रसोमृतं ब्रह्म भूर्भुवः स्वरों ॥ ६८ श्रद्धायां प्राणे
निविष्टोमृतं जुहोमि श्रद्धायामपाने निविष्टोमृतं जुहोमि ॥ श्रद्धा
यां व्यानेन निविष्टोमृतं जुहोमि श्रद्धायामुदाने निविष्टोमृतं जुहो
मि श्रद्धायाꣳ समाने निविष्टोमृतं जुहोमि ब्रह्मणि म आत्मा
मृतत्वाय अमृतोपस्तरणमसि श्रद्धायां प्राणे निविष्टोमृतं जुहो
मि शिवो मा विशाप्रदाहाय प्राणाय स्वाहा श्रद्धायामपाने नि
विष्टोमृतं जुहोमि शिवो मा विशाप्रदाहाय अपानाय स्वाहा ॥
श्रद्धायां व्याने निविष्टोमृतं जुहोमि शिवो मा विशाप्रदाहाय व्या

79

नायस्वाहा। श्रद्धायामुदानेनिविष्टोमृतंजुहोमि। शिवोमाविशाप्रदाहाय। उदानायस्वाहा। श्रद्धायाꣳसमानेनिविष्टोमृतंजुहोमि शिवोमाविशाप्रदाहाय। समानायस्वाहा। ब्रह्मणिमआत्मा अमृतत्वाय। अमृतापिधानमसि। ६९। श्रद्धायांप्राणेनिविश्यामृतꣳहुतं। प्राणमन्नेनाप्यायस्व। श्रद्धायामपानेनिविश्यामृतꣳहुतं। अपानमन्नेनाप्यायस्व। श्रद्धायांव्यानेनिविश्यामृतꣳहुतं। व्यानमन्नेनाप्यायस्व। श्रद्धायामुदानेनिविश्यामृतꣳहुतं। उदानमन्नेनाप्यायस्व। श्रद्धायाꣳसमानेनिविश्यामृतꣳहुतं। समानमन्नेनाप्यायस्व। ७०। अंगुष्ठमात्रःपुरुषोंगुष्ठंचसमाश्रितः। ईशःसर्वस्यजगतः प्रभुःप्रीणातिविश्वभुक्। ७१। वाङ्मआसन्। नसोःप्राणः। अक्ष्योश्चक्षुः। कर्ण

यो श्रोत्रं बाहुवोर्बलं ॥ ऊरु वोरोजः ॥ अरिष्टा विश्वान्यंगानि तनूः ॥ तनुवा मे सह नमस्ते अस्तु मा मा हिंसीः ॥ ७४ ॥ वयः सुपर्णा उपसेदुरिंद्रं प्रियमेधा ऋषयो नाधमानाः ॥ अपध्वांतमूर्णुहि पूर्द्धि चक्षुर्मुमुग्ध्यस्मान्निधयेव बद्धान् ॥ ७३ ॥ प्राणानां ग्रंथिरसि रुद्रो मा विशांतकः ॥ तेनान्नेनाप्यायस्व ॥ नमो रुद्राय विष्णवे मृत्युर्मे पाहि ॥ ७५ ॥ त्वमग्ने द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि ॥ त्वं वनेभ्यस्त्वमोषधीभ्यस्त्वं नृणां नृपते जायसे शुचिः ॥ ७६ ॥ शिवेन मे संतिष्ठस्व स्योनेन मे संतिष्ठस्व सुभूतेन मे संतिष्ठस्व ब्रह्मवर्चसेन मे संतिष्ठस्व यज्ञस्यर्द्धिमनुसंतिष्ठस्वोप ते यज्ञ नम उप ते नमः ॥ ७७ ॥ सत्यं परं पर

ऽसत्यऽ सत्येन न स्वर्गाल्लोकाच्च्यवंते कदाचन सताꣳ हि
सत्यं तस्मात्सत्ये रमंते तप इति तपो नानशनात्परं यद्धि परं त
पस्तद्दुर्द्धर्षं तद्दुराधर्षं तस्मात्तपसि रमंते दम इति नियतं ब्र
ह्मचारिणस्तस्माद्दमे रमंते शम इत्यरण्ये मुनयस्तस्माच्छमे र
मंते दानमिति सर्वाणि भूतानि प्रशꣳसंति दानान्नातिदुष्करं
तस्माद्दाने रमंते धर्म इति धर्मेण सर्वमिदं परिगृहीतं धर्मा
न्नातिदुष्करं तस्माद्धर्मे रमंते प्रजन इति भूयाꣳसस्तस्माद्भूयि
ष्ठाः प्रजायंते तस्माद्भूयिष्ठाः प्रजनने रमंतेऽग्नय इत्याह तस्मा
दग्नय आधातव्या अग्निहोत्रमित्याह तस्मादग्निहोत्रे रम
ते यज्ञ इति यज्ञो हि देवास्तस्माद्यज्ञे रमंते मानसमिति विद्वा
ꣳसस्तस्माद्विद्वाꣳस एव मानसे रमंते न्यास इति ब्रह्मा ब्रह्मा

४१ ४१

82

हि परः परो हि ब्रह्मा तानि वा एतान्यवराणि परांसि न्यास एवात्यरेचयद्य एवं वेदेत्युपनिषत् ॥ ७९ ॥ प्राजापत्यो हारुणिः
सुपर्णेयः प्रजापतिं पितरमुपससार किं भगवंतः परमं वदंती
ति तस्मै प्रोवाच सत्येन वायुरावाति सत्येनादित्यो रोचते दिवि स
त्यं वाचः प्रतिष्ठा सत्ये सर्वं प्रतिष्ठितं तस्मात्सत्यं परमं वदंति तप
सा देवा देवतामग्र आयंतपसर्षयः सुवरन्वविंदंतपसा सपत्नां
प्रणुदामारातीस्तपसि सर्वं प्रतिष्ठितं तस्मात्तपः परमं वदंति द
मेन दान्ताः किल्बिषमवधून्वंति दमेन ब्रह्मचारिणः सुवरग
च्छं दमो भूतानां दुराधर्षं दमे सर्वं प्रतिष्ठितं तस्माद्दमः परमं वदं
ति शमेन शांताः शिवमाचरंति शमेन नाकं मुनयोन्वविंदं शमो भू

83

तानां दुराधर्षं छमे सर्वं प्रतिष्ठितं तस्माच्छमः परमं वदंति दा
नं यज्ञानां वरूथं दक्षिणा लोके दातारः सर्वभूतान्युपजीवंति दाने
नारातीरपानुदंत दानेन द्विषंतो मित्रा भवंति दाने सर्वं प्रतिष्ठि
तं तस्माद्दानं परमं वदंति धर्मो विश्वस्य जगतः प्रतिष्ठा लोके
धर्मिष्ठं प्रजा उपसर्पंति धर्मेण पापमपनुदंति धर्मे सर्वं प्रतिष्ठि
तं तस्माद्धर्मं परमं वदंति प्रजननं वै प्रतिष्ठा लोके साधु प्रजाया
स्तंतुं तन्वानः पितॄणामनृणो भवति तदेव तस्या अनृणं तस्मा
त्प्रजननं परमं वदंत्यग्नयो वै त्रयी विद्या देवयानः पंथा गार्ह ८२
पत्य ऋक् पृथिवी रथंतरमन्वाहार्यपचनं यजुरंतरिक्षं वाम
देव्यमाहवनीयः साम सुवर्गो लोको बृहत्तस्मादग्नीन्परमं व
दंत्यग्निहोत्रं सायंप्रातर्गृहाणां निष्कृतिः स्विष्टं सुहुतं

यज्ञक्रतूनांमायया ऽ स्वर्गस्यलोकस्यज्योतिस्तस्मादग्नि
होत्रंपरमंवदंति यज्ञइतियज्ञेनहिदेवादिवंगता यज्ञेनासुरा
नपानुदंत यज्ञेनद्विषंतोमित्राभवंति यज्ञेसर्वंप्रतिष्ठितंतस्मा
द्यज्ञंपरमंवदंति मानसंवैप्राजापत्यंपवित्रंमानसेनमनसासा
धुपश्यतिमानसाऋषयः प्रजाऽअसृजंतमानसेसर्वंप्रतिष्ठितं
तस्मान्मानसंपरमंवदंति न्यासइत्याहुर्मनीषिणोब्रह्माणंब्र
ह्माविश्वःकतमःस्वयंभुप्रजापतिःसंवत्सरइतिसंवत्सरोसा
वादित्योयएषआदित्येपुरुषःसपरमेष्ठीब्रह्मात्माथाभिरादित्य
स्तपतिरश्मिभिस्ताभिःपर्जन्योवर्षतिपर्जन्येनोषधिवनस्पतयः
प्रजायंतेओषधिवनस्पतिभिरन्नंभवत्यन्नेनप्राणाःप्राणैर्बलंब
लेनतपस्तपसाश्रद्धाश्रद्धयामेधामेधयामनीषामनीषयामनोम

८३

न सा शांतिः शांत्यावित्तं वित्तेन स्मृतिः ॥ स्मृत्या स्मारं ॥ स्मारेण
विज्ञानं विज्ञानेनात्मानं वेदयति तस्मादन्नं ददन्त्सर्वाण्येतानि
ददात्यन्नात्प्राणा भवंति भूतानां प्राणैर्मनो मनसश्च विज्ञानं
विज्ञानादानंदो ब्रह्मयोनिः स वा एष पुरुषः पंचधा पंचात्मा
येन सर्वमिदं प्रोतं पृथिवी चांतरिक्षं च द्यौश्च दिशश्चावांतर
दिशाश्च स वै सर्वमिदं जगत्स सभूतं ॥ स भव्यं जिज्ञास कॢप्त
ऋतजा रयिष्ठा श्रद्धा सत्यो महस्वां तपसो वरिष्ठा ज्ञात्वा तमेवं
मनसा हृदा च भूयो न मृत्युमुपयाहि विद्वान् तस्मान्न्यासमेषां तप
सामतिरिक्तमाहुर्वसुरण्वो विभूरसि प्राणे त्वमसि संधाता ब्र
ह्मन्त्वमसि विश्वधृत्तेजोदास्त्वमस्यग्निरसि वर्चोदास्त्वमसि
सूर्यस्य द्युम्नोदास्त्वमसि चंद्रमस उपयामगृहीतोसि ब्रह्मणे

८३

त्यामहस ओमित्यात्मानं युंजीतैतद्वै महोपनिषदं देवानां गु
ह्यं यः एवं वेद ब्रह्मणो महिमानमाप्नोति तस्माद्ब्रह्मणो म
हिमानमित्युपनिषत् ॥ ७९ ॥ तस्यैवं विदुषो यज्ञस्यात्मा यज
मानः श्रद्धा पत्नी शरीरमिध्ममुरो वेदि लोमानि बर्हिः शिखा वेदः
हृदयं यूपः काम आज्यं मन्युः पशुस्तपोग्निर्दमः शमयिता
दक्षिणा वाग्घोता प्राण उद्गाता चक्षुरध्वर्युर्मनो ब्रह्मा श्रोत्र
मग्नीध्यावद्ध्रियते सा दीक्षा यदश्नाति तद्धविर्यत्सिबति तद
स्य सोमपानं यद्रमते तदुपसदो यत्संचरत्युपविशत्युत्तिष्ठ
ते च स प्रवर्ग्यो यन्मुखं तदाहवनीयो या व्याहृतिराहुतिर्य
दस्य विज्ञानं तज्जुहोति यत्सायं प्रातरति तत्समिधं यत्प्रात
र्मध्यंदिनं सायं च तानि सवनानि ये अहोरात्रे ते दर्शपूर्ण

मासोये र्धमासाश्च मासाश्च ते चातुर्मास्यानि य ऋतवस्ते प
शुबंधाये संवत्सराश्च परिवत्सराश्च ते ह र्गणाः सर्ववेदसं
वा एतत्सत्रं यन्मरणं तदवभृथ एतद्वै जरामर्यमग्निहोत्र
ꣳ सत्रं य एवं विद्वानुदगयने प्रमीयते देवानामेव महिमा
नं गत्वादित्यस्य सायुज्यं गच्छत्यथ यो दक्षिणे प्रमीयते पितृ
णामेव महिमानं गत्वा चंद्रमसः सायुज्यꣳ सलोकतामाप्नो
त्येतौ वै सूर्याचंद्रमसौ महिमानौ ब्राह्मणो विद्वानभिजयति
तस्माद्ब्रह्मणो महिमानमाप्नोति तस्माद्ब्रह्मणो महिमानम् ॥ ८८
॥ ८० ॥ सह नाववतु सह नौ भुनक्तु सह वीर्यं करवावहै तेज
स्वि नावधीतमस्तु मा विद्विषावहै ॥ ॐ शांतिः शांतिः शांतिः ॥
श्री कुलस्वामिनी जगदंबे ऐश्वर्य्यपरमस्तु ॥ शुभं भवतु ॥

श्रीरस्तु ॥ यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया ॥ यदि
शुद्धमशुद्धं वा मम दोषो न विद्यते ॥ १ ॥
शके १७०९ प्लवंगनामाब्दे उदगयने आषाढशुद्धाष्टम्यां
मंदे तद्दिने इदं अरुणोपनिषत् पुस्तकं मुरारभट्टस्य सूनुना
सदाशिववखरेपा लिखितम् ॥
आषाढशुक्लेवाष्टम्यां मंदे वासरसंयुते ॥ सदाशिवेन
लिखितं पुस्तकं वारुणाभिधम् ॥ १ ॥
अरुणोपनिषत्समाप्तः ॥

४५

॥इदं पुस्तकं नारायणोपनिषदस्य॥
॥मुरारवखरे यस्य पुस्तकं सत्यं॥
॥समाप्तिपत्र॥ ७ ॥ ७ ॥ ७॥

४५

[OrderDescription]
,CREATED=13.10.20 15:11
,TRANSFERRED=2020/10/13 at 15:22:48
,PAGES=90
,TYPE=STD
,NAME=S0003993
,Book Name=M-1894-PASHCHOPNISHAD
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF

FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,